# Shriman
# MAHĀBHĀRATAM.

## Part III

## IV Viratparvan

WITH

## Bharata Bhawadeepa By Nīlkantha.

***Edited by***

Pandit Ramchandrashastri Kinjawadekar.

*PRINTED & PUBLISHED*

BY

**SHANKAR NARHAR JOSHI**

Chitrashala Press, 1026 Sadashiv Peth, Poona City.

*Shake 1852.* ] *First Edition.* [ *A. D. 1931.*

# श्रीमन्महाभारतम्।

## तृतीयभागे विराटपर्व

### चतुर्धरवंशावतंसश्रीमन्नीलकण्ठविरचित-भारतभावदीपाख्यटीकया समेतम् ।

पण्डित रामचंद्रशास्त्री किंजवडेकर इत्येतैः पाठान्तर-टिप्पण्यादियोजनया समलङ्कृतम् ।

तच्च

पुण्याख्यपत्तने

१०२६ सदाशिववीथ्यां चित्रशालाख्ये मुद्रणालये 'शंकर नरहर जोशी' इत्येतैः संमुद्र्य प्रकाशितम् ।


शालिवाहनशकाब्दाः १८५२] प्रथमं संस्करणम् । [ख्रिस्ताब्दाः १९३१

॥ श्रीभारती विजयते ॥

# प्रास्ताविकम् ।

–२–

यथा समुद्रो भगवान् यथा मेरुर्महागिरिः ।
उभौ ख्यातौ रत्ननिधी तथा भारतमुच्यते ॥

—आदिपर्व

विदितमेवैतद्विदुषामष्टादशसु पर्वसु विभक्तं महाभारतमिति । तदिदं महाभारतमष्टादशपर्वसंमितं 'शतसाहस्री संहिता' इति सुप्रथितचरम् । अत एव बहुषु स्थलेषु 'वैयासक्यां शतसाहस्र्यां संहितायाम्' इत्याद्युल्लेखो दृश्यते । तथापि तत्रैवं ध्येयं, येयं लक्षश्लोकात्मिका संख्या सा केवलस्य महाभारतस्योताहो हरिवंशसहितस्य ? इति प्रश्ने संप्रत्युपलब्धस्य केवलस्य महाभारतस्य श्लोकसंख्या नैव शतसहस्रसंमिता किंतु चतुरशीतिसहस्रप्रभृतिनवतिसहस्रपर्यंतं सा दरीदृश्यते । अतो हरिवंशसहितमेव महाभारतं लक्षश्लोकात्मकं स्यात्कथंचिन्न केवलमिति भाति ।

अयि प्राज्ञाः ! वस्तुतस्तु महाभारतश्लोकसंख्याविषये बहवो विवदन्ते । नाद्यापि श्रीमद्व्यासविरचितस्य केवलस्य महाभारतस्य कति श्लोकाः संति के च त इत्यसंशयं निर्देष्टुं शक्यते । तथापि—

'एकं शतसहस्रं च मयोक्तं वै निबोधत'

इत्यादिपर्वणि प्रथमाध्याये सूतेन पठितत्वान्महाभारतस्य शतसाहस्री संहिता इत्ययमर्थोऽविकल एवेति सिद्धम् ।

यदेतत्परंपराप्राप्तं महाभारतं स एव जयापरनामक इतिहास इत्यस्मिन्नेव महाभारत उक्तम्—

जयो नामेतिहासोऽयम्, इति ।

अस्य महाग्रंथस्य महाभारतमिति नाम महत्वाद्भारवत्त्वाद्भारतानामितिहासत्वाच्चोच्यते । अस्मिन् ग्रंथ आर्याणां प्राचीना बहव इतिहासभूता वृत्तान्ताः सविस्तरं तत्र तत्र दृष्टान्तोपदृष्टान्ततयाऽऽख्यानोपाख्यानकथनद्वारा च वर्णिता इति नैतान्तिरोहितं संख्यावताम् । उदारमतिना भगवता व्यासेन विरचितेऽस्मिन्ग्रंथे प्रायः सर्वे विषयाः सन्ति । आर्याणां प्राचीना वर्णाश्रमादिव्यवस्था, सामा-

जिकं, भौगोलिकं, दार्शनिकं, ज्योतिर्विषयकं च विज्ञानं; लोकरीतयः, धर्मनीतयः, कुटिलनीतयः इत्यादयो नैके परः सहस्रं विषया महाभारतऽतिपाद्याः। येन येन यद्यदपेक्ष्यते ज्ञानं तत्तदत्र सुतरां सन्निहितमिव विराजते। किं बहुना—

धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ ॥

यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित् ॥—आदिपर्व

इत्यादिना महाभारतस्य महत्ता साक्षात्सूतेन महाभारत एव वर्णिता।

न केवलं महाभारतमितिहासः किं त्वार्षं महाकाव्यमपि। तथाहि—'त्वया च काव्यमित्युक्तं तस्मात्काव्यं भविष्यति'—इत्यादिनाऽस्मिन् ग्रंथ एवास्य काव्यतया वर्णनान्महाकाव्यलक्षणानुसारित्वाच्च। श्रीमत्तिलकमहोदयैर्लोकमान्यपदवीभाग्भिरस्य महाभारताख्यस्य महाकाव्यस्य वक्ष्यमाणप्रकारेण लक्षणं विरचितम्—

महत्सु राजवंशेषु जातानां दिव्यकर्मणाम् ॥
श्रीविभूतिमतां वाऽपि प्राचीनानां महात्मनाम् ॥ १ ॥

चरितं कीर्त्यते यत्र पुण्यमेकार्थसंगतम् ॥
इतिहासप्रधानार्थं शीलचारित्र्यवर्धनम् ॥ २ ॥

धीरोदात्तं च गहनं श्रव्यैर्वृत्तैरलंकृतम् ॥
वाक्यजातिविशेषैश्च रसोत्कर्षप्रपोषकैः ॥ ३ ॥

अद्भुतार्थाः कथा यत्र धर्मकामार्थसंश्रिताः ॥
लोकयात्राक्रमश्चापि पावनः प्रतिपाद्यते ॥ ४ ॥

विचित्रार्थपदाख्यानं सूक्ष्मार्थन्यायबृंहितम् ॥
रोमहर्षणकृत्काव्यमनेकसमयान्वितम् ॥
महाकाव्यं वरिष्ठं तन्महार्थं चार्षसंज्ञितम् ॥ ५ ॥

एतल्लक्षणानुसारेण महाभारतमिदमार्षमहाकाव्यसंज्ञको ग्रंथ इति श्रीमत्तिलकमहाभागैः प्रतिपादितं तदतीव समुचितम्। लक्षणसमन्वयस्तु स्पष्टार्थत्वान्महाभारतस्यमहाभारतप्रशंसादिवेत्तॄणां मनसि स्वत एव स्फुरेदिति तद्विषये नैवात्मीयां लेखनीं व्यापारयितुमिच्छामः।

महाभारतस्य जयापरनामधेयस्यार्षमहाकाव्यस्य कर्ता भगवान् बादरायणः। अस्यैव व्यासः, सत्यवतीसुतः, कृष्णद्वैपायनः पाराशर्य इत्यभिधेयान्तराणि। स खलु यमुनाद्वीपे पराशरात् सत्यवत्यां जज्ञे। अयं च

विव्यास वेदान् यस्मात्स तस्माद्व्यास इति स्मृतः।

वेदव्यासास्त्वष्टाविंशतिसंख्याकाः। तेष्वयमन्तिमो व्यासो बादरायणः। तथाचोक्तं देवीभागवते—द्वापरे प्रथमे व्यस्ताः स्वयं वेदाः स्वयंभुवा। प्रजापतिर्द्वितीये तु द्वापरे व्यासकार्यकृत्। तृतीये चोशना व्यासश्चतुर्थे तु बृहस्पतिः। पञ्चमे सविता व्यासः षष्ठो मृत्युस्तु द्वापरे। मघवा सप्तमे प्राप्ते वसिष्ठश्चाष्टमे स्मृतः। सारस्वतश्च नवमे त्रिधामा दशमे तथा। एकादशे च त्रिवृषो भारद्वाजस्ततः परे। त्रयोदशे चांतरिक्षो धर्मो चापि चतुर्दशे। त्रय्यारुणः पञ्चदशे षोडशे तु धनंजयः। मेधातिथिः सप्तदशे व्रती ह्यष्टादशे तथा। अत्रिरेकोनविंशेऽथ गौतमस्तु ततः परे। उत्तमाश्चैकविंशेथ हर्यात्मा यश्च कीर्तितः। वेनो वाजश्रवाश्चैव सोमो न्यूषायणस्तथा। तृणबिंदुस्तथा व्यासो भार्गवस्तु ततः परे। ततः शक्तिर्जातुकर्णो कृष्णद्वैपायनस्ततः॥ अष्टाविंशतिसंख्येयं कथिता या मया श्रुता इति। यद्ययं बादरायणो व्यासेष्वन्तिमस्तथापि गुणगरिम्णा सर्वानधिशेते। तथा चोक्तं भगवता—

'द्वैपायनोऽस्मि व्यासानाम्' इति

अयं व्यासो द्वापरे संबभूव। एतेन महान्वेदराशिश्चतुर्धा विभक्तः। अस्य खलु सुमन्तु—जैमिनि—वैशम्पायन—पैला इति चत्वारः शिष्या आसन्। तत्र पैलो ऋग्वेदमध्यैष्ट, वैशंपायनो यजुर्वेदं, जैमिनिः सामवेदं, सुमंतुश्चाथर्ववेदम्। व्यासविरचिता ग्रन्थास्त्विमे—

१ महाभारतं लक्षश्लोकात्मकमितिहासः।
२ ब्रह्मपुराणं दशसहस्रात्मकम् (१००००)
३ पद्मपुराणं पञ्चोनषष्टिसहस्रात्मकम् (५५०००)
४ विष्णुपुराणं त्रयोविंशतिसहस्रात्मकम् (२३०००)
५ शिवपुराणं चतुर्विंशतिसहस्रात्मकम् (२४०००)
६ भागवतमष्टादशसहस्रात्मकम् (१८०००)
७ नारदपुराणं पंचविंशतिसहस्रात्मकम् (२५०००)
८ मार्कण्डेयपुराणं नवसहस्रात्मकम् (९०००)
९ अग्निपुराणं पञ्चदशसहस्रात्मकम् (१५०००)
१० भविष्यपुराणं पंचशताधिकचतुर्दशसहस्रात्मकम् (१४५००)
११ ब्रह्मवैवर्तपुराणमष्टादशसहस्रात्मकम् (१८०००)
१२ लिंगपुराणमेकादशसहस्रात्मकम् (११०००)
१३ वराहपुराणं चतुर्विंशतिसहस्रात्मकम् (२४०००)
१४ स्कंदपुराणमेकादशोत्तरमेकाशीतिसहस्रात्मकम् (८१० ११
१५ वामनपुराणं दशसहस्रात्मकम् (१००००)
१६ कूर्मपुराणं सप्तदशसहस्रात्मकम् (१७०००)
१७ मत्स्यपुराणं चतुर्दशसहस्रात्मकम् (१४०००)
१८ गरुडपुराणमेकोनविंशतिसहस्रात्मकम् (१९०००)

१९ ब्रह्माण्डपुराणं द्वादशसहस्रात्मकम् ( १२००० )
२० वेदान्तशारीरकमीमांसासूत्राणि च ।

पुराणानां श्लोकसंख्याविषये बह्व्यो विप्रतिपत्तयः । तथापि सामान्यतः संख्योपरि निर्दिष्टा इत्यवधेयं सुधीभिः ।

अयि ! विपश्चिदपश्चिमाः पण्डितप्रकाण्डाः ! श्रीमद्भगवत्या वाग्देव्याः कृपाकटाक्षेण महाभारतस्यायं विराटोद्योगभीष्मपर्वात्मकस्तृतीयो भागो यथामति संशोध्य भावत्ककरकमलयोर्विन्यस्तः । अस्य भागस्य सूक्ष्मेक्षिकया द्वितीयभागदर्शितादर्शपुस्तकानां साहाय्येन संशोधनं व्यधायि । प्रयतितं च यावच्छक्यं शुद्धाशुद्धविषये । तथापि यदत्र मुद्रायन्त्राघातजनिताक्षरभेदवशात्, मुद्रायोजकस्याज्ञानादस्मदीयदृग्भ्रमाच्च यदि केचन मुद्रणदोषा उपलभ्येयुस्तथापि भ्रान्तेः पुरुषधर्मत्वमाकलय्य क्षन्तव्योऽयं जन इति प्रार्थयित्वा महाभारतस्य चतुर्थे भागे प्रायो द्रोण-कर्ण-शल्य-सौप्तिकानि पर्वाण्यागच्छेयुर्यथाकालं स भवद्दृष्टिपथमवतीर्णश्च स्यादित्यावेदनपूर्वकं विरमति—

महाशिवरात्रिः
शाकः १८५२

विद्वद्विधेयः
किञ्जवडेकरोपाह्वो रामचन्द्रशास्त्री ।
पुण्यपत्तनस्थभारतीभुवननिवासी

ॐ

# चित्राणां सूचीपत्रम् ।

[ १ ]

विराटपर्व पृ० १

[ २ ]

नैव त्वां जातु हिंस्यात् स इतः संप्रेषितां मया ।
इत्युक्त्वा प्रददौ पात्रं सपिधानं हिरण्मयम् ॥ १६ ॥ —विराट अ. १५ पृ. २४.

[ ३ ]

सा शङ्कमाना रुदती दैवं शरणमीयुषी ।
प्रातिष्ठत सुराहारी कीचकस्य निवेशनम् ॥ १७ ॥ —विराट अ. १५ पृ. २४.

[ ४ ]

उपातिष्ठत सा सूर्यं मुहूर्तमबला ततः ॥ १९ ॥ —विराट अ. १५ पृ. २४.

[ ५ ]

स तस्यास्तनुमध्यायाः सर्वं सूर्योऽवबुद्धवान् ।
अंतर्हितं ततस्तस्या रक्षो रक्षार्थमादिशत् ।
तच्चैनां नाजहात्तत्र सर्वावस्थास्वनिन्दिताम् ॥ २० ॥ —विराट अ. १५ पृ. २४.

[ ६ ]

स्वागतं ते सुकेशान्ते सुव्युष्टा रजनी मम ।
स्वामिनी त्वमनुप्राप्ता प्रकुरुष्व मम प्रियम् ॥ १ ॥ —विराट अ. १६ पृ. २४.

[ ७ ]

उत्तरं सारथिं कृत्वा शमीं कृत्वा प्रदक्षिणम् ।
आयुधं सर्वमादाय प्रययौ पाण्डवर्षभः ॥ १ ॥ —विराट अ. ४६ पृ. ६४.

[ ८ ]

उद्योगपर्व पृ० १

[ ९ ]

ततः शयाने गोविन्दे प्रविवेश सुयोधनः ।
उच्छीर्षतश्च कृष्णस्य निषसाद वरासने ॥ ८ ॥
ततः किरीटी तस्यानुप्रविवेश महामनाः ।
पश्चाच्चैव स कृष्णस्य प्रह्वोऽतिष्ठत् कृताञ्जलिः ॥ ९ ॥ —उद्योग अ. ७ पृ. ८

[ १० ]

अयं ते पुण्डरीकाक्ष ! दुःशासनकरोद्धृतः ।
स्मर्तव्यः सर्वकार्येषु परेषां सन्धिमिच्छता ॥ ३६ ॥ —उद्योग अ. ८२ पृ. १५९

[ ११ ]

[ सात्यकिरुवाच— ]

इमं हि पुण्डरीकाक्षं जिघृक्षन्त्यल्पचेतसः ।
पटेनाग्निं प्रज्वलितं यथा बाला यथा जडाः ॥१६॥ —उद्योग अ. १३० पृ. २१५

[ १२ ]

भीष्मपर्व पृ० १

[ १३ ]

श्रीभगवानुवाच—

कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् ।
अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन ॥ २ ॥ —भीष्म अ. २६ पृ. ४५

[ १४ ]

अमी च त्वा धृतराष्ट्रस्य पुत्राः सर्वे सहैवावनिपालसङ्घैः ।
भीष्मो द्रोणः सूतपुत्रस्तथाऽसौ सहास्मदीयैरपि योधमुख्यैः॥२६॥ -भीष्म अ. ३५ पृ.१०८

[ १५ ]

[ भीष्म उवाच— ]

मुसला इव मे घ्नन्ति नेमे बाणाः शिखण्डिनः ।
वज्रदण्डसमस्पर्शा वज्रवेगदुरासदाः ॥ ६२ ॥ --भीष्म. अ. ११९ पृ. २८५

[ १६ ]

अविध्यत्पृथिवीं पार्थः पार्श्वे भीष्मस्य दक्षिणे ।
उत्पपात ततो धारा वारिणो विमला शुभा ॥२४॥ -भीष्म अ. १२१ पृ. २९०

॥ श्रीभारती जयतु ॥

# ॥ महाभारतम् ॥

## विराटपर्व ।

—४—

### विषयानुक्रमणिका ।


| अ० श्लोकाः | विषयः | पृष्ठम् |
| --- | --- | --- |
| | ( १ ) पाण्डवप्रवेशपर्व | १—१९ |
| १—२८ | प्रकरणादौ नारायणं नमस्कृत्येत्यादि मङ्गलम्—पाण्डवानामज्ञातवासप्रकारविषयके जनमेजयप्रश्ने वैशम्पायनस्योत्तरम्-युधिष्ठिरेण भ्रातृभिः सह मन्त्रणेन विराटनगरे निवासनिर्धारणम्—युधिष्ठिरेण स्वस्य यतिवेषग्रहणपूर्वकं विराटसभास्तारीभवनं कथयित्वा भीमं प्रति तत्कर्तव्याविषयकः प्रश्नः— | २ |
| २—३२ | भीमसेनः सूदवेषेणाहं विराटनगरे चरिष्यामीत्यब्रवीत्—ततो युधिष्ठिरस्य भीमं प्रत्यर्जुनकर्तव्यकर्मविषये प्रश्नः—षण्ढवेषेण बृहन्नलेति स्वनाम प्रख्याप्यान्तःपुरस्त्रियो गीत-नृत्य—वादित्रादि शिक्षयन्विराटनगरे विहरिष्यामीत्यर्जुनेन स्वकर्तव्यकर्मणः कथनम्— | ४ |
| ३—२३ | धर्मो नकुलं कर्तव्यकर्मविषये पप्रच्छ—ततो 'ग्रन्थिक' इति नाम प्रख्याप्याश्वबन्धो भूत्वा मत्स्याश्वशिक्षादि कर्म कुर्वन्विराटनगरे विहरिष्यामीति नकुलः प्रत्यवोचत्—तथा च 'तन्तिपाल' नाम्ना गोपालको भूत्वा चरिष्यामीति सहदेवः प्रोवाच—सैरन्ध्रीवेषेण राजभार्यां सुदेष्णामुपस्थास्ये इति द्रौपद्यब्रवीद्युधिष्ठिरं प्रति— | ५ |
| ४—५८ | युधिष्ठिरस्य भीमादिभ्रातॄन् प्रति स्वाग्निरक्षण—सूतादिप्रस्थापनविषयिण्युक्तिः—धौम्यो युधिष्ठिरादीन्प्रति राजगृहवासविषयिणीं नीतिमभ्यधात्-वैशम्पायनकथितः पाण्डवानां प्रस्थानवृत्तान्तः— | ८ |
| ५—३६ | द्रौपदीसहिताः पाण्डवाः स्वान्यस्त्राण्यादाय पदातय एव शूरसेनादीन् देशानतिक्रम्यात्मनो व्याधान् ब्रुवाणा विराटनगराभ्याशं प्रापुः-तत उत्पथे गहने महतीं शमीं दृष्ट्वा तस्यामायुधानि समासज्य तत्र मायाशवं च निर्मायास्माकं कुलधर्मोऽयं यच्छवस्योद्बन्धनमिति मार्गे गोपालादीन् कथयन्तः परस्परव्यवहारार्थं गुह्यानि नामानि धृत्वा राजधानीसमीपमाजग्मुः— | १० |
| ६—३५ | युधिष्ठिरकृतो दुर्गास्तवः प्रस- | |

| अ० | श्लोकाः | विषयः | पृष्ठम् |
| --- | --- | --- | --- |
| | | श्रायास्तस्याः सकाशाद्वरलाभश्च— | ११ |
| ७ | १८ | युधिष्ठिरस्य विप्ररूपेणाक्षान्कक्षे निक्षिप्य विराटसभायां प्रवेशः-तस्य महानुभावतां वीक्ष्य विराटेन समास्तारीकरणम्- | १३ |
| ८ | १३ | भीमस्य सूदवेषेण विराटसभायां प्रवेशः-सत्कृत्य विराटेन तत्काम्यया स्वमहानसाधिपत्ये नियोजनम्— | १४ |
| ९ | ३७ | द्रौपद्याः सैरन्ध्रीवेषेण विराटनगरे प्रवेशः-राजभार्यया सुदेष्णया समाहूय स्ववेश्मनि तस्या निवासनम्— | १६ |
| १० | १६ | गोपालवेषधारणपूर्वकं सहदेवस्य विराटसभायां प्रवेशः-विराटेन सत्कृत्य तस्य गोरक्षणे नियोजनम्— | १७ |
| ११ | १४ | अर्जुनस्य षण्ढवेषेण विराटसभायां प्रवेशः-विराटेन राज्ञा तस्य प्रमदाभिरपुंस्त्वं परीक्ष्य कन्यकान्तःपुरे कन्यानाटने विनियोजनम्— | १८ |
| १२ | १३ | हयानीक्षमाणं नकुलं प्रेक्ष्य विराटेन नूनमयं हयज्ञो भवितेति वितर्क्य तमाहूय शिल्पं च पृष्ट्वाऽश्वपालने तस्य नियोजनम्— | १९ |
| | | **( २ ) समयपालनपर्व १९-२१** | |
| १३ | ४६ | पाण्डवाचरणविषयके जनमेजयप्रश्ने वैशम्पायनस्योत्तरम्-सर्वैः पाण्डवैः स्वकर्मणा नृपं तोषयित्वा लब्धद्रव्यस्य विक्रयव्याजेन यथार्हं भ्रातृषु विभजनम्-वसत्सु पाण्डवेषु चतुर्थे मासे उत्सवप्रसङ्गेनागतानां मल्लानां मध्ये प्रधानेन जीमूतेन सह युद्धार्थं विराटाज्ञया भीमसेनस्य रङ्गप्रवेशः-युद्धं कुर्वतः सर्वमल्लोपमर्दिना भृशमुत्सिक्तस्य जीमूतमल्लस्य बाहुयुद्धे भीमेन कृतो वधः— | २१ |
| | | **( ३ ) कीचकवधपर्व २१-३९** | |
| १४ | ५२ | सुदेष्णागृहे कदाचिद्द्रौपदीं सैरन्ध्रीवेषेण परिचरन्तीमालोक्योन्मादमुपगतवता कीचकेन सुदेष्णां प्रति तस्याः प्रार्थनम्-ततो द्रौपदीमेत्य त्वत्सङ्गमसङ्कल्पविवृद्धेन कामाग्निना दह्यमानमात्मप्रदानेनोद्धरेति प्रार्थना-द्रौपद्या परदाराभिमर्शने दोषान्, स्वस्य दुर्लभत्वं चोक्त्वा स्वात्मानं कामयमानस्य कीचकस्य परुषभाषणैः प्रत्याख्यानम्— | २३ |
| १५ | २१ | कीचकेन सुदेष्णां प्रति द्रौपद्याः स्ववशीकरणप्रार्थना—कीचकप्रियचिकीर्षया तद्भवने सुराहरणव्याजेन हठाद्द्रौपद्याः प्रेषणम्-द्रौपदीप्रार्थितेन सूर्येण तद्रक्षणार्थं निगूढं रक्षसो नियोजनम्— | २४ |
| १६ | ५१ | स्वसमीपागतया द्रौपद्या सह कीचकस्य संवादः-कीचकेन द्रौपद्याः स्वशयनारोहणप्रार्थनामगृह्णन्त्याः प्रसह्योत्तरीयग्रहणम्-तं समाक्षिप्य शरणार्थं राजसभां प्राप्तां तां पृष्ठतो धावता कीचकेन केशेष्वाकृष्य भूमौ पातयित्वा पदा हननम्-सूर्यप्रेषितेन रक्षसाऽपवाहितस्य कीचकस्य मूर्च्छाप्राप्तिः—पदाघातं कुर्वता कीचकेनावमानितां द्रौपदीं दृष्ट्वा क्रुद्धस्य भीमस्य युधिष्ठिरेण कृतं सङ्केतेन सान्त्वनम्-द्रौपद्या विलपनपूर्वकं सभ्यानभिक्षिपन्त्या युधिष्ठिरवचनात् सुदेष्णाभवने गमनम्-द्रौपद्याः सुदेष्णया सह संवादः— | २६ |

| अ० | श्लोकाः | विषयः | पृष्ठम् |
|---|---|---|---|
| १७ | २१ | द्रौपद्या कीचकवधं चिन्तयन्त्या महानिशि महानसं गत्वा भीमस्य प्रबोधनम्—भीमेन तां प्रत्यागमनप्रयोजनप्रश्नः— | २७ |
| १८ | ३३ | द्रौपद्या भीमस्यामर्षजननाय द्यूतसभायामाकर्षणादिस्मारणपूर्वकं कीचककृतस्वाभिभवनिरूपणम्—पूर्वविभवमनुस्मृत्य पाण्डवान्प्रत्यशोचनम्— | २९ |
| १९ | | विराटगृहस्थान् युधिष्ठिरादीन्प्रति प्रत्येकं नामनिर्देशपूर्वकमनुशोचनम्— | ३० |
| २० | ३१ | पूर्वविभवमनुस्मृत्य सम्प्रति दासीभूतामात्मानं परिशोचन्त्या द्रौपद्याः किणवन्तौ पाणी मुखमानीय भीमस्य रोदनम्— | ३२ |
| २१ | ५१ | भीमसेनेन सुकन्यादिदृष्टान्तैः परिसान्त्वितया द्रौपद्या कीचककृतं स्वपराभवमुपवर्ण्य भीमस्य कीचकवधे प्रेरणम्— | ३४ |
| २२ | ९४ | भीमेन कीचकवधमङ्गीकृत्य द्रौपदीं प्रति तदुपायकथनम्—पुनः प्रार्थितवता कीचकेन द्रौपदीसमयेऽङ्गीकृते तं प्रति द्रौपद्या सङ्केतस्थानादिकथनम्—पुनर्भीममागत्य द्रौपद्या कीचकमारणोपाये कथिते तयोर्मिथः संवादः—पूर्वमेव भीमे नर्तनागारं प्रविष्टेऽनन्तरं द्रौपदीसङ्गमाशयाऽऽगतस्य कीचकस्य पूर्वमागत्य स्थितं भीमं प्रत्युक्तिः—उपहासोक्तिपूर्वकं भीमे मारणायोद्यते सत्युभयोर्बाहुयुद्धम्—श्रान्तस्य कीचकस्य भ्रामणादिपुरःसरं भीमेन वधः—भीमस्तत्राग्निं प्रज्वाल्य मांसपिण्डाकृति कीचकशरीरं द्रौपद्यै दर्शयित्वा तामामन्त्र्य पुनर्महानसं ययौ—द्रौपद्या निवेदितं कीचकवधं श्रुत्वा सभापाला आगत्य तथाविधं कीचकं ददृशुः— | ३७ |
| २३ | ३४ | कीचकमन्त्यसंस्कारेण संस्कर्तुं बहिर्नयन्तो रुदन्तः कीचकबान्धवा उपकीचकाख्यया प्रसिद्धास्तत्र स्तम्भमालिङ्ग्य तिष्ठन्तीं द्रौपदीं दृष्ट्वाऽस्याः कृते कीचको हत इति रोषात्तामपि तेन सह दग्धुमिच्छन्तस्तस्मिन्नेव याने तां निबध्य श्मशानाभिमुखं जग्मुः—ततो द्रौपद्या आक्रोशमात्रेण भीमस्यामार्गेण द्रौपद्यभयदानपूर्वकं तद्रक्षार्थं वेषं परिवर्त्य श्मशानाभिमुखं गमनम्—श्मशानस्थं महान्तं वृक्षमुत्पाट्य तेनोपकीचकानां द्रौपदीं त्यक्त्वा प्राद्रवतां निःशेषं हननम्—ततो द्रौपद्या बन्धनं विमुच्य सुदेष्णाभवने प्रेषणं मार्गान्तरेण भीमस्य स्वस्थाने गमनं च— | ३८ |
| २४ | ३० | पौरैर्गन्धर्वकृते कीचकवधे कथिते विराटस्तान्दग्धुं भृत्यानाज्ञाप्य द्रौपदीनिर्वासनार्थं सुदेष्णामब्रवीत्—द्रौपदी विराटनगरं प्रत्यागत्य महानसद्वारि स्थितं भीमं प्रति सङ्केतेनोक्त्वा नर्तनागारेऽर्जुनं ददर्श—राजकन्याभिराश्वासितायाः सैरन्ध्र्याः कटाक्षपूर्वकं बृहन्नलया संवादः—राजगृहप्रविष्टां द्रौपदीं प्रति 'सैरन्ध्रि गच्छ भद्रं ते' इत्याद्युक्तवतीं सुदेष्णां प्रति द्रौपदी त्रयोदशाहपर्यन्तं राजा क्षाम्यत्वित्याद्यब्रवीत्— | ३९ |


## (४) गोहरणपर्व ४०—१००


| अ० | श्लोकाः | विषयः | पृष्ठम् |
|---|---|---|---|
| २५ | २२ | दुर्योधनप्रयुक्तैश्चारैश्चिरमन्विष- | |

| अ० | श्लोकाः | विषयः | पृष्ठम् |
|---|---|---|---|
| | | द्भिरपि पाण्डवप्रवृत्तिमलभमानैर्विराटनगरे सैरन्ध्रीनिमित्तं गन्धर्वैर्दृश्यमानैर्निशि सानुजस्य कीचकस्य वधं श्रुतवद्भिर्हास्तिनपुरं गत्वा राज्ञे तस्य वृत्तान्तस्य निवेदनम्— | ४० |
| २६ | —१८ | चाराणां पाण्डवाज्ञानाद्दुर्योधनस्य विषादः-कर्णेन चारान्तरप्रेषणविधानं दुःशासनेन तदनुमत्यापि पाण्डवानां विनाशसम्भावनम्— | ४१ |
| २७ | —१० | दुर्योधनं प्रति न तादृशा विनश्यन्तीत्यादिप्रकारेण द्रोणोपदेशः— | ४२ |
| २८ | —३३ | पाण्डवानां धर्मनित्यतया यत्र सर्वतः शुभान्येव सन्निपतन्ति स तदधिष्ठितो देश इति भीष्मेण पाण्डवनिवासलक्षणाभिधानम्— | ४३ |
| २९ | —१४ | नीत्युपदेशपूर्वकं कृपस्योपदेशः— | ४४ |
| ३० | —२७ | त्रिगर्तराजेन सुशर्मणा कीचकवधं श्रुत्वा विराटनगराभियानस्य प्राप्तकालत्वकथनम्-तथा भीष्माद्यनुमत्या सुशर्मणो विराटनगरमेत्य दक्षिणभागे गोहरणम्— | ४५ |
| ३१ | —३५ | गोपैर्द्रुततरमागत्य विराटं प्रति सुशर्मणा गोहरणनिवेदनम्-विराटादिभिर्युद्धाय निर्गमोद्यमः-विराटाज्ञया शतानीकेन दत्तं रथादि स्वीकृतवतां पाण्डवानां गोप्रत्याहरणाय त्रिगर्तान्प्रत्यभियानम्— | ४७ |
| ३२ | —३० | विराटसुशर्मसैन्ययोर्युद्धवर्णनम्--शतानीकादिभिर्हतानां परिसङ्ख्यानम्-विराटसुशर्मणोर्युद्धम्— | ४८ |
| ३३ | —६१ | भ्रातृसहितेन सुशर्मणा पराजित्य विराटे गृहीते पलायमानेषु मत्स्येषु युधिष्ठिराज्ञया युद्धार्थं भीमस्य सुशर्मसमीपगमनम्-युद्धप्रवृत्तं भीमं दृष्ट्वा परावृत्ते विराटसैन्ये युधिष्ठिरादीनां युद्धम्--युद्धप्रसङ्गे पलायमानं, भीमवाक्यात् परावृत्य युध्यमानं सुशर्माणं गृहीतवति भीमे त्रिगर्तानां पलायनम्-बद्धं सुशर्माणं युधिष्ठिरसमीपमानीय तदाज्ञया तं भीमो मुमोच— | ५० |
| ३४ | —१९ | तां रात्रिं सङ्ग्रामभूमावेव निवसता विराटेन पाण्डवानां वित्तादिना पूजनम्-पाण्डवैस्तत्प्रतिनन्दनम्-युधिष्ठिरवचनान्मत्स्येन प्रेरितैर्दूतैः सूर्योदये विराटनगरे राज्ञो जयघोषणा— | ५१ |
| ३५ | —२२ | दुर्योधनेन भीष्मद्रोणादिभिः सह विराटनगरमेत्योत्तरभागे गोपान् विद्राव्य गवां हरणम्-गोपाध्यक्षेण राजसदनं प्रविश्यान्तःपुरस्थितमुत्तरं प्रति कौरवैर्गोहरणस्य निवेदनपूर्वकं युद्धाय प्रोत्साहनम्— | ५२ |
| ३६ | —२४ | गोपवाक्यश्रवणानन्तरमन्तःपुरे कुशलसारथ्यभावकथनयुक्तामुत्तरस्य शौर्योक्तिं श्रुतवतोऽर्जुनस्य द्रौपदीं प्रत्युक्तिः—द्रौपद्या बृहन्नलायाः सारथ्यकर्मनिपुणत्वे कथिते भगिनीं प्रत्युत्तरवाक्यम्— | ५३ |
| ३७ | —३४ | भ्रातृवाक्येन नर्तनागारमागतयोत्तरयाऽतिनिर्बन्धेन भ्रातृसारथ्यकरणे प्रार्थिताया बृहन्नलाया उत्तरसमीपगमनम्-उत्तरप्रार्थनया बृहन्नलया सारथ्येऽङ्गीकृते युद्धार्थं निर्गच्छत्युत्तरे कुरुवस्त्रानयनार्थं प्रेरयन्ती उत्तरादिकन्याः प्रत्युदीर्यार्जुनेनोत्तररथहयानां प्रेरणम्— | ५५ |
| ३८ | —५१ | कुरुसैन्यदर्शनेन भीतमुत्तरं | |

| अ० श्लोकाः | विषयः | पृष्ठम् |
|---|---|---|
| | 'नोत्सहे कुरुभिर्योद्धुम्' इत्याद्युक्तवन्तं प्रत्यर्जुनस्योत्तेजनवाक्यम्-'कामं हरन्तु मत्स्यानाम्' इत्याद्युक्त्वा रथात्प्रस्कन्द्योत्तरस्य पलायनम्—तदनु पार्थेन रथादवप्लुत्यास्य केशेषु ग्रहणम्-तदवलोकयतां कुरूणामर्जुनविषये विमर्शः—अर्जुनेनाहं कुरुभिर्योत्स्ये त्वं केवलं मदीयं सारथ्यं कुर्वित्यादिवचनैः समाश्वास्योत्तरस्य रथे आरोपणम्— | ५६ |
| ३९—१७ | रथारूढार्जुनदर्शनेन भीष्मादिषु चिन्तयत्सूत्पातदर्शनोत्तरं वदतो द्रोणस्य युद्धार्थं क्लीबवेषेणागतोऽयमर्जुन एवेति निश्चयः—दुर्योधनेनायमर्जुनश्चेन्मम कार्यसिद्धिरेवेति द्रोणं निर्भर्त्सयन्तं कर्णं प्रति कथनम्— | ५७ |
| ४०—८ | शमीवृक्षसमीपमुपागत्योत्तरं प्रत्यर्जुनेन शमीवृक्षाद्धनुरवरोपणचोदना— | ५८ |
| ४१—१२ | शम्यां शवनिधानश्रवणेन तामारोढुं विचारयत उत्तरस्यार्जुनोपदेशाच्छमीमारुह्य धनुरवरोपणे प्रवृत्तिः— | ५८ |
| ४२—१८ | पाण्डवकार्मुकाद्यवलोकनविस्मितस्योत्तरस्यार्जुनं प्रति तत्तदायुधवर्णनपूर्वकं तत्तत्स्वामिविषयकः प्रश्नः— | ६० |
| ४३—२३ | अर्जुनेनोत्तरं प्रति युधिष्ठिराद्यायुधानां पृथक् पृथङ्निर्देशेन तत्तत्स्वामिकत्वकथनम्— | ६१ |
| ४४—२५ | अर्जुनेनोत्तरं प्रति स्वस्यार्जुनत्वकथनपूर्वकं कङ्कादीनां युधिष्ठिरादित्वकथनम्-तत्प्रत्ययार्थं स्वकीयनामदशककथनं तन्निर्वचनं च— | ६२ |
| ४५—४१ | बृहन्नलायामर्जुनत्वविज्ञानेन शीघ्रं गाण्डीवाद्यायुधानां रथे निधानम्-पार्थेन तदाश्वासनम्-अर्जुनेनोत्तरं प्रति स्वस्य क्लैब्यत्वप्राप्तिहेतुकथनम्—अस्त्राणामभिध्यानम्—अस्त्रदेवतासान्निधानम्—प्रणिपातपूर्वकं तासां युद्धे मनसि सन्निधानप्रार्थना— | ६४ |
| ४६—३३ | उत्तरेण सह युद्धार्थं प्रस्थितेनार्जुनेन स्मृतमात्रस्य वानरलक्षणध्वजस्य रथे प्रादुर्भावः-स्वशङ्खनिनादश्रवणसंत्रस्तमुत्तरं समाश्वास्य पुनरर्जुनेन शङ्खाध्मापनम्-रथनिर्घोषश्रवणेन निमित्तदर्शनेन चार्जुनागमनं शंसता द्रोणाचार्येण सेनां व्यूह्यावस्थानविधानम्— | ६५ |
| ४७—३४ | द्रोणवचनादर्जुनस्यार्जुनत्वावधारणेन विषादात्तूष्णींभूतेषु स्वीयेषु दुर्योधनेन तेषां विभ्रान्तमनसां सैनिकानां प्रोत्साहनम्-कर्णेन द्रोणोपालम्भः— | ६७ |
| ४८—२३ | कर्णेनात्मश्लाघापूर्वकं सर्वेषां तिरस्कारोऽर्जुनपराभवप्रतिज्ञानं च— | ६८ |
| ४९—२३ | कृपेणार्जुनचरित्रप्रशंसनपूर्वकं कर्णगर्हणम्—तथा स्वेषु एकैकेनार्जुनस्य दुर्जयत्वकथनपूर्वकं सम्भूयाभियानानिर्धारणम्— | ६९ |
| ५०—२८ | द्रोणनिन्दाश्रवणेन क्रुद्धेनाश्वत्थाम्ना कर्णदुर्योधनयोररुन्तुदेन वचसाऽधिक्षेपः— | ७१ |
| ५१—२२ | कर्णकृतद्रोणकृपाधिक्षेपसङ्क्रुद्धस्याश्वत्थाम्नो भीष्मेण द्रोणादिप्रशंसनपूर्वकं परिसान्त्वनम्—कर्णदुर्योधनाभ्यां द्रोणादिक्षमापनम्— | ७२ |
| ५२—२३ | भीष्मेण दुर्योधनं प्रति पाण्डवानामज्ञातकालवासश्चान्द्रमानेन पूर्ण इति कथनम्-पाण्डवपराक्रमप्रशंसनपूर्वकं सङ्ग्रामराज्यप्रदानयोरन्यतरानुष्ठाननिर्णयचोदना-राज्यदानं प्रतिषेधन्तं | |

| अ० श्लोकाः | विषयः | पृष्ठम् |
|---|---|---|
| | कृतत्वमुक्त्वा तत्पराक्रमं चोपवर्ण्य तं दिदृक्षते राज्ञे स सम्प्रत्यन्तर्हितो द्वित्रैरहोभिः प्रादुर्भविष्यतीत्यभिधानम्—पार्थेनोत्तरायै रणाहृतवस्त्रभूषणादिसमर्पणम्—उत्तरेण सह पाण्डवैरग्रेतनकर्तव्यमन्त्रणम् | १०० |

( ५ ) वैवाहिकपर्व १००–१०४

| अ० श्लोकाः | विषयः | पृष्ठम् |
|---|---|---|
| ७०—२८ | कुरुविजयदिनात्तृतीये दिवसे प्रभाते युधिष्ठिरादिभी राजलक्षणानि धृत्वा सदोगतैर्नृपासनेषूपवेशनम्—ततः सभां प्रविष्टेन विराटेन राज्ञा तांस्तथावस्थितान्वीक्ष्य कङ्कबुध्या सरोषं युधिष्ठिरस्य राजासनोपवेशनाधिक्षेपः—अर्जुनेन विराटं प्रति युधिष्ठिरस्य याथातथ्यकथनेनेन्द्रासनारोहणार्हत्वमभिधाय राजासनारोहणार्हत्वप्रतिपादनम्— | १०१ |
| ७१—३६ | भीमादीन्पृच्छते विराटायार्जुनेन बल्लवादीन् भीमत्वादिना निरूप्य सर्वेषां तद्गृहे सुखेन निवासाभिधानम्—पुनर्हृष्टेनोत्तरेणासाधारणाकारेण युधिष्ठिरादीन्निर्दिश्यार्जुनपराक्रमवर्णनम्—उत्तरेण सह सम्मन्त्र्य राज्ञा सकोशदण्डराज्यनिवेदनेन युधिष्ठिरं प्रसाद्य मुदा सर्वाश्चाभिनन्द्योत्तराया अर्जुनभार्यात्वेन प्रतिग्रहप्रार्थनम्—स्नुषात्वेनार्जुनेन तस्याः स्वीकारः— | १०२ |
| ७२—४० | राज्ञा पृष्टेनार्जुनेनोत्तराया भार्यात्वेनापरिग्रहे लोकान्यथाशङ्कापाकरणरूपहेत्वभिधानम्—विराटेनार्जुनप्रशंसनपूर्वकमभिमन्यवे कन्यादानाङ्गीकारः—युधिष्ठिरेण तदनुज्ञानम्-विराटेन युधिष्ठिरेण च श्रीकृष्णाय सुहृद्भ्यश्च दूतप्रेषणम्-पाण्डवानामुपप्लव्यनगरगमनम्-तत्र सर्वेषां पाण्डवपक्षीयाणां राज्ञां समागमनमभिमन्युना सहोत्तराया विवाहोत्सवश्च— | १०४ |
| | श्रवणमहिमा— | १०५ |
| | भविष्यत्पर्वसूचनपूर्वकं विराटपर्वसमाप्तिः— | १०६ |

समाप्तेयं विराटपर्वविषयानुक्रमणिका ।

॥ शुभं भवतु ॥

ॐ

# विराटपर्व

४

# ॥ महाभारतम् ॥

## विराटपर्व ।

## -४-

### पाण्डवप्रवेशपर्व १

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥ १

जनमेजय उवाच ।
कथं विराटनगरे मम पूर्वपितामहाः ।
अज्ञातवासमुषिता दुर्योधनभयार्दिताः ॥ २
पतिव्रता महाभागा सततं ब्रह्मवादिनी ।
द्रौपदी च कथं ब्रह्मन्नज्ञाता दुःखिताऽवसत् ॥ ३
वैशम्पायन उवाच ।
यथा विराटनगरे तव पूर्वपितामहाः ।
अज्ञातवासमुषितास्तच्छृणुष्व नराधिप ॥ ४
तथा स तु वराँल्लब्ध्वा धर्मो धर्मभृतां वरः ।
गत्वाऽऽश्रमं ब्राह्मणेभ्य आचख्यौ सर्वमेव तत् ५
कथयित्वा तु तत् सर्वं ब्राह्मणेभ्यो युधिष्ठिरः ।
अरणीसहितं तस्मै ब्राह्मणाय न्यवेदयत् ॥ ६
ततो युधिष्ठिरो राजा धर्मपुत्रो महामनाः ।
संनिवर्त्यानुजान् सर्वानिति होवाच भारत ॥ ७

---

#### नीलकण्ठी टीका–

श्रीगणेशाय नमः । श्रीमल्लारये नमः ।

श्रीमद्गोपालमानम्य प्राचीनाचार्यवर्त्मना ।
विराटपर्वप्रद्योती भावदीपो वितन्यते ॥ १ ॥

तत्र पूर्वस्मिन् पर्वणि ' दिष्ट्या पंचसु रक्तोऽसि दिष्ट्या ते षट्पदी जिता । द्वे पूर्वे मध्यमे द्वे च द्वे चान्त्ये साम्परायिके 'इति ' शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्यति' इति श्रुतिप्रसिद्धेष्वात्मदर्शनसाधनेषु शमादिषु रक्तः, षडूर्मिलक्षणां षट्पदीं जातमात्रस्याशनापिपासे प्ररूढस्य शोकमोहौ वृद्धस्य जरामृत्यू इति लोके 'योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति' इति वेदे च प्रसिद्धां जयतीत्युक्तं तां जितवता त्वव्यक्तलिङ्गेन स्थेयमात्यान्तिक्यां कृतकृत्यतायां तु व्यक्तलिङ्गेनापि भाव्यमित्येतत् पाण्डवाचरणप्रदर्शनेन दर्शयितुं विराटपर्वारभते । तत्र 'वर्षं त्रयोदशमिदं मत्प्रसादात् कुरूद्वहाः । विराटनगरे गूढा अविज्ञाताश्चरिष्यथ ' इति प्राक्कथितधर्मवाक्यार्थमनुवदन् जनमेजय उवाच–**कथमिति** । पूर्वः पिता परीक्षित् । तस्य पितामहाः अज्ञातवासं यथा स्यात् तथा कथमुषिताः वासं कृतवन्तः । समूलघातं न्यवधीदितिवत् कषादित्वाद्वसतेरनुप्रयोगः । वासमिति णमुलन्तम् ॥ २ ॥ ब्रह्मवादिनी श्रीकृष्णकीर्तनशीला ॥ ३ ॥ अरणीसहितमरण्योर्मिथुनम् । अरणीसहितं मन्थामिति पाठे मन्थोऽग्निनिर्मथनदण्डस्तमरणीभ्यां सहितं ब्राह्मणाय न्यवेदयादित्यर्थः ॥ ६ ॥ सन्निवर्त्य एकत्र आनीय । अत्र वर्ततिर्गत्यर्थो 'न च पुनरावर्तते 'इत्यादिप्रयोगदर्शनात् । सन्निकृष्येतिपाठेऽपि स एवार्थः ॥ ७ ॥

द्वादशेमानि वर्षाणि राज्यविप्रोषिता वयम् ।
त्रयोदशोऽयं सम्प्राप्तः कृच्छ्रात् परमदुर्वसः ॥ ८
स साधु कौन्तेय इतो वासमर्जुन रोचय ।
संवत्सरमिमं यत्र वसेमाविदिताः परैः ॥ ९

अर्जुन उवाच ।

तस्यैव वरदानेन धर्मस्य मनुजाधिप ।
अज्ञाता विचरिष्यामो नराणां नात्र संशयः १०
तत्र वासाय राष्ट्राणि कीर्तयिष्यामि कानिचित् ।
रमणीयानि गुप्तानि तेषां किञ्चित् स्म रोचय ११
सन्ति रम्या जनपदा बह्वन्नाः परितः कुरून् ।
पाञ्चालाश्चेदिमत्स्याश्च शूरसेनाः पटच्चराः ॥ १२
दशार्णा नवराष्ट्राश्च मल्लाः शाल्वा युगन्धराः ।
कुन्तिराष्ट्रं च विपुलं सुराष्ट्रावन्तयस्तथा ॥ १३
एतेषां कतमो राजन् निवासस्तव रोचते ।
यत्र वत्स्यामहे राजन् संवत्सरमिमं वयम् ॥ १४

युधिष्ठिर उवाच ।

श्रुतमेतन्महाबाहो यथा स भगवान् प्रभुः ।
अब्रवीत् सर्वभूतेशस्तत् तथा न तदन्यथा ॥ १५
अवश्यं त्वेव वासार्थं रमणीयं शिवं सुखम् ।
सम्मन्त्र्य सहितैः सर्वैर्वस्तव्यमकुतोभयैः ॥ १६
मत्स्यो विराटो बलवानभिरक्षोऽथ पाण्डवान् ।
धर्मशीलो वदान्यश्च वृद्धश्च सततं प्रियः ॥ १७
विराटनगरे तात संवत्सरमिमं वयम् ।
कुर्वन्तस्तस्य कर्माणि विहरिष्याम भारत ॥ १८
यानि यानि च कर्माणि तस्य वक्ष्यामहे वयम् ।
आसाद्य मत्स्यं तत् कर्म ब्रूत कुरुनन्दनाः ॥१९

अर्जुन उवाच ।

नरदेव कथं तस्य राष्ट्रे कर्म करिष्यसि ।
विराटनगरे साधो रंस्यसे केन कर्मणा ॥ २०
मृदुर्वदान्यो ह्रीमांश्च धार्मिकः सत्यविक्रमः ।
राजंस्त्वमापदाऽऽकृष्टः किं करिष्यसि पाण्डव २१
न दुःखमुचितं किञ्चिद्राजा वेद यथा जनः ।
स इमामापदं प्राप्य कथं घोरां तरिष्यसि ॥ २२

युधिष्ठिर उवाच ।

शृणुध्वं यत् करिष्यामि कर्म वै कुरुनन्दनाः ।
विराटमनुसम्प्राप्य राजानं पुरुषर्षभाः ॥ २३
सभास्तारो भविष्यामि तस्य राज्ञो महात्मनः ।
कङ्को नाम द्विजो भूत्वा मताक्षः +प्रियदेवनः २४
वैदूर्यान् काञ्चनान् दान्तान् फलैर्ज्योतीरसैः सह ।
कृष्णाक्षाँल्लोहिताक्षांश्च निर्वत्स्र्यामि मनोरमान् ॥
विराटराजं रमयन् सामात्यं सहबान्धवम् ।
न च मां वेत्स्यते कश्चित् तोषयिष्ये च तं नृपम् २६
आसं युधिष्ठिरस्याहं पुरा प्राणसमः सखा ।
इति वक्ष्यामि राजानं यदि मां सोऽनुयोक्ष्यते † ॥
इत्येतद्वो मयाऽऽख्यातं विहरिष्याम्यहं यथा ।
वृकोदर विराटे त्वं रंस्यसे केन *हेतुना ॥ २८

इति श्रीमहाभारते विराटपर्वणि पाण्डवप्रवेशपर्वणि युधिष्ठिरादिमन्त्रणे
प्रथमोऽध्यायः ॥ १ ॥

अयं संवत्सरः । संवत्सरामिमामिति वाक्यशेषात् ॥ ८ ॥ वत्स्याम इति पाठ आविदिता इति छेदः ॥ ९ ॥ नराणामज्ञाता इति सम्बन्धः ॥ १० ॥ प्रभुर्धर्मः । ' यद्यपि स्वेन रूपेण चरिष्यथ महीमिमाम् । न वो विज्ञा(स्य)यते कश्चित्त्रिषु लोकेषु कश्चन' इत्यब्रवीत् ॥ १५ ॥ यद्यप्येवं तथापि किंचित्प्रच्छन्नतया वस्तव्यमेवेत्याह-अवश्यं त्वेवेति ॥१६॥ वक्ष्यामहे निर्वोढुं शक्ष्यामह इति वहेरिदं रूपम् । प्रब्रूत प्रत्येकमिति शेषः ॥ १९ ॥ सभास्तारः सभ्यः । ' सभासदः सभास्तारा: 'इत्यमरः। कङ्को नामतः। 'कङ्कश्छद्मद्विजे ख्यातो लोहपृष्ठकृतान्तयोः' इति विश्वकोशात्। स्वस्य कृतान्तसूनुत्वेन 'आत्मा वै पुत्रनामासि'इति श्रुतेस्तदनन्यत्वात् तन्नाम्नो धारणे मिथ्यावादित्वं न भविष्यतीति भावः । मताक्षो बृहदश्वाज्ज्ञाताक्षतत्त्वः । प्रियदेवनः क्रीडाप्रियः ॥ २४ ॥ दान्तान् गजदन्तमयान् । दन्तः पर्वतसानु तत्सदृशान् वा शारीन् निर्वत्स्र्यामि चालयिष्यामि। 'दन्तः सानुनि कथ्यते' इति विश्वः। तानेव चतुर्वर्णानाह-वैदूर्यान् हरितमणिमयान् नीलान्, काञ्चनान् सौवर्णान् पीतान्, ज्योतींषि च रसाश्च ज्योतीरसास्तैः सह । ज्योतिःशब्देनात्र लोहितं लक्ष्यते । 'यदग्ने रोहितं रूपं तेजसस्तद्रूपम् ' इति श्रुतेः । ज्योतीरूपाः लोहिताः। रसः पारदस्तद्रूपाः श्वेताः । तैरुभयैः सह चतुर्वर्णसम्पत्तिः । तथा फलैः शारीस्थापनार्थानि कोष्ठयुक्तानि काष्ठादिमयानि फलकानि तैः सह । तेषां निर्वर्तने करणमाह-कृष्णाक्षान् कृष्णा अक्षाः पाशाः येषां चालनार्थमिति कृष्णाक्षास्तान् शारीनेव । तथा लोहिताक्षानित्यपि ॥ २५ ॥ युधिष्ठिराख्यस्य शरीरस्य यथा प्राण उत्थापकस्तद्वच्चिदात्माऽपीति प्राणसाम्येन युधिष्ठिरात्मैव विवक्षित इति भावः । अनुयोक्ष्यते प्रश्नं करिष्यति ॥ २७ ॥ इति श्रीमहाभारते विराटपर्वणि नैलकण्ठीये भारतभावदीपे प्रथमोऽध्यायः ॥१ ॥ + प्रियदेविन-घ. † प्रक्ष्यतीत्यर्थः ।
* कर्मणा-घ.

## २

भीमसेन उवाच ।
पौरोगवो ब्रुवाणोऽहं बल्लवो नाम भारत ।
उपस्थास्यामि राजानं विराटमिति मे मतिः ॥ १
सूपानस्य करिष्यामि कुशलोऽस्मि महानसे ।
कृतपूर्वाणि यान्यस्य व्यञ्जनानि सुशिक्षितैः ॥ २
तान्यप्यभिभाविष्यामि प्रीतिं सञ्जनयन्नहम् ।
आहरिष्यामि दारूणां निचयान् महतोऽपि च ३
यत् प्रेक्ष्य विपुलं कर्म राजा संयोक्ष्यते स माम् ।
अमानुषाणि कुर्वाणस्तानि कर्माणि भारत ॥
राज्ञस्तस्य परे प्रेष्या मंस्यन्ते मां यथा नृपम् ।
भक्ष्यान्नरसपानानां भविष्यामि तथेश्वरः ॥ ५
द्विपा वा बलिनो राजन् वृषभा वा महाबलाः ।
विनिग्राह्या यदि मया निग्रहीष्यामि तानपि ॥६
ये च केचिन्नियोत्स्यन्ति समाजेषु नियोधकाः ।
तानहं हि नियोत्स्यामि रतिं तस्य विवर्धयन् ७
न त्वेतान् युद्ध्यमानान् वै हनिष्यामि कथञ्चन ।
तथैतान् पातयिष्यामि यथा यास्यन्ति न क्षयम्
आरालिको गोविकर्ता सूपकर्ता नियोधकः ।
आसं युधिष्ठिरस्याहमिति वक्ष्यामि पृच्छतः ॥ ९
आत्मानमात्मना रक्षंश्चरिष्यामि विशाम्पते ।
इत्येतत् प्रतिजानामि विहरिष्याम्यहं यथा ॥ १०
युधिष्ठिर उवाच ।
यमग्निर्ब्राह्मणो भूत्वा समागच्छन्नृणां वरम् ।
दिधक्षुः खाण्डवं दावं दाशार्हसहितं पुरा ॥ ११
महाबलं महाबाहुमजितं कुरुनन्दनम् ।
सोऽयं किं कर्म कौन्तेयः करिष्यति धनञ्जयः १२
योऽयमासाद्य तं दावं तर्पयामास पावकम् ।
विजित्यैकरथेनेन्द्रं हत्वा पन्नगराक्षसान् ॥ १३
वासुकेः सर्पराजस्य स्वसारं हृतवांश्च यः ।
श्रेष्ठो यः प्रतियोधानां सोऽर्जुनः किं करिष्यति
सूर्यः प्रतपतां श्रेष्ठो द्विपदां ब्राह्मणो वरः ।
आशीविषश्च सर्पाणामग्निस्तेजस्विनां वरः ॥ १५
आयुधानां वरं वज्रं ककुद्मी च गवां वरः ।
ह्रदानामुदधिः श्रेष्ठः पर्जन्यो वर्षतां वरः ॥ १६
धृतराष्ट्रश्च नागानां हस्तिष्वैरावणो वरः ।
पुत्रः प्रियाणामधिको भार्या च सुहृदां वरा १७
यथैतानि विशिष्टानि जात्यां जात्यां वृकोदर ।
एवं युवा गुडाकेशः श्रेष्ठः सर्वधनुष्मताम् ॥ १८
सोऽयमिन्द्रादनवरो वासुदेवान्महाद्युतिः ।
गाण्डीवधन्वा बीभत्सुः श्वेताश्वः किं करिष्यति
उषित्वा पञ्च वर्षाणि सहस्राक्षस्य वेश्मनि ।
अस्त्रयोगं समासाद्य स्ववीर्यान्मानुषाद्भुतम् ।
दिव्यान्यस्त्राणि चाप्तानि देवरूपेण भास्वता २०
यं मन्ये द्वादशं रुद्रमादित्यानां त्रयोदशम् ।
वसूनां नवमं मन्ये ग्रहाणां दशमं तथा ॥ २१
यस्य बाहू समौ दीर्घौ ज्याघातकठिनत्वचौ ।
दक्षिणे चैव सव्ये च गवामिव वहः कृतः ॥ २२
हिमवानिव शैलानां समुद्रः सरितामिव ।
त्रिदशानां यथा शक्रो वसूनामिव हव्यवाट् ॥ २३
मृगाणामिव शार्दूलो गरुडः पततामिव ।
वरः सन्नह्यमानानां सोऽर्जुनः किं करिष्यति २४

---

२

**पौरोगव इति** । पुरः पुरस्तात् गावो रश्मयो यस्य स पुरोगुर्वायुः । पिण्डोत्पत्तौ हि प्रथमं रजोरेतसोः कल्के वायुरश्मिभूतः प्राण आविर्भवति । पश्चादिन्द्रियान्तराणीति शास्त्रप्रसिद्धम् । तस्य पुत्रः पौरोगवः । लोके तु पौरोगवो महानसाध्यक्षः, बल्लवः सूपकारः, एतदेव ममान्वर्थं नाम ॥ १ ॥ ईश्वरो यथेष्टं विनियोगकर्ताऽत एव नृपो यथा तथा प्रियोऽहं लोकानां भविष्यामीत्युक्तम् ॥ ५ ॥ नियोत्स्यामि निहीनं यथा स्यात्तथा माणवजं योत्स्यामि ॥ ७ ॥ तदेवाह–न त्विति ॥ ८ ॥ 'आरालिको गोविकर्ता सूपकर्ता नियोधकः' इति । अराला मत्तगजास्तैः सह क्रीडति तान् जयति वा आरालिकः । 'अरालः कुटिले सर्जरसे वै मत्तदन्तिनि ' इति विश्वः । गोविकर्ता गवां महतां बलीवर्दानामपि विकर्ता दमनेन विकृतिजनकः । वृषभान्वा महाबलान्निग्रहीष्यामीत्युपक्रमात् । सूपकर्ता मुद्रादिविकारकर्ता । पक्षे हुतगमुपकर्ता । नियोधको मारणवर्जं मल्लयुद्धकर्ता । पक्षे नितरां योधकः । विषमश्लोकीकृतस्त्वारालिकः प्रकृतीनां गुणदोषसूचको हस्तिदमको वा । तथा च विक्रमादित्यः–'आरालिकः सूचनको हस्तिनां दमकस्तथा ' इति । गोविकर्ता गवां वाचां विकर्ता गद्यपद्यादिभेदानां प्रयोक्तेति । केचित्तु–'आरालिकोऽन्नपाकी स्यात् सूपकर्ता तु शाककृत् । तैलान्नं पचते यस्तु गोविकर्ता स उच्यते 'इत्यप्युदाहरन्ति । तत्र मूलं द्रष्टव्यम् ॥९॥ वासुकेः स्वसारमुलूपीं हृतवान् सौन्दर्येणेति शेषः ॥ १४ ॥ सर्पाणां सरीसृपाणाम् । आशीविषो दंष्ट्राविषः ॥ १५ ॥ मानुषेष्वद्भुतं मानुषाद्भुतम् ॥ २० ॥ गवां वृषभाणां स्कन्धे इव वहो युगघर्षणजः किणः कृतः । एतस्यैव गोपनं कठिनमिति भावः ॥ २२ ॥ पततां पक्षिणाम् ॥ २४ ॥

अर्जुन उवाच ।

प्रतिज्ञां षण्ढकोऽस्मीति करिष्यामि महीपते ।
ज्याघातौ हि महान्तौ मे संवर्तुं नृप दुष्करौ २५
वलयैश्छादयिष्यामिबाहू ×किणकृताविमौ ।
कर्णयोः प्रतिमुच्याहं कुण्डले ज्वलनप्रभे ॥ २६
पिनद्धकम्बुः पाणिभ्यां तृतीयां प्रकृतिं गतः ।
वेणीकृतशिरा राजन् नाम्ना चैव बृहन्नला ॥ २७
पठन्नाख्यायिकाश्चैव स्त्रीभावेन पुनः पुनः ।
रमयिष्ये महीपालमन्यांश्चान्तःपुरे जनान् ॥ २८
गीतं नृत्यं विचित्रं च वादित्रं विविधं तथा ।
शिक्षयिष्याम्यहं राजन् विराटस्य पुरस्त्रियः २९
प्रजानां समुदाचारं बहुकर्म कृतं वदन् ।
छादयिष्यामि कौन्तेय माययाऽऽत्मानमात्मना॥
युधिष्ठिरस्य गेहे वै द्रौपद्याः परिचारिका ।
उषिताऽस्मीति वक्ष्यामि पृष्टो राज्ञा च पाण्डव
एतेन विधिना छन्नः कृतकेन यथा नलः ।
विहरिष्यामि राजेन्द्र विराटभवने सुखम् ॥ ३२

इति श्रीमहाभारते विराटपर्वणि पाण्डवप्रवेशपर्वणि युधिष्ठिरादिमन्त्रणे द्वितीयोऽध्यायः ॥ २ ॥

## ३

वैशम्पायन उवाच ।

इत्येवमुक्त्वा पुरुषप्रवीर-
स्तथाऽर्जुनो धर्मभृतां वरिष्ठः ।
वाक्यं तथाऽसौ विरराम भूयो
नृपोऽपरं भ्रातरमाबभाषे ॥ १

युधिष्ठिर उवाच ।

किं त्वं नकुल कुर्वाणस्तत्र तात चरिष्यसि ।
कर्म तत् त्वं समाचक्ष्व राज्ये तस्य महीपतेः ।
सुकुमारश्च शूरश्च दर्शनीयः सुखोचितः ॥ २

नकुल उवाच ।

अश्वबन्धो भविष्यामि विराटनृपतेरहम् ।
सर्वथा ज्ञानसम्पन्नः कुशलः परिरक्षणे ॥ ३
ग्रन्थिको नाम नाम्नाऽहं कर्मैतत् सुप्रियं मम ।
कुशलोऽस्म्यश्वशिक्षायां तथैवाश्वचिकित्सने ।
प्रियाश्च सततं मेऽश्वाः कुरुराज यथा तव ॥ ४
ये मामामन्त्रयिष्यन्ति विराटनगरे जनाः ।
तेभ्य एवं प्रवक्ष्यामि विहरिष्याम्यहं यथा ॥ ५
पाण्डवेन पुरा तात अश्वेष्वधिकृतः पुरा ।
विराटनगरे छन्नश्चरिष्यामि महीपते ॥ ६

युधिष्ठिर उवाच ।

सहदेव कथं तस्य समीपे विहरिष्यसि ।
किं वा त्वं कर्म कुर्वाणः प्रच्छन्नो विहरिष्यसि ७

सहदेव उवाच ।

गोसङ्ख्याता भविष्यामि विराटस्य महीपतेः ।
प्रतिषेद्धा च दोग्धा च सङ्ख्याने कुशलो गवाम्

---

षण्ढकोऽस्मीति । षण्ढो गोपतिः श्रीगोपालः । तस्य प्रतिकृतिरवतारान्तरं षण्ढकः। कृष्णसखाऽस्मीत्यर्थः । पक्षे क्लीबः। 'षण्ढो वर्षवरे क्लीबे गोपतौ वन्ध्यपूरुषे' इति विश्वः । संवर्तुं पिधातुम् ॥ २५ ॥ पिनद्धाः कम्बवः शंखवलयानि येन स पिनद्धकम्बुः । तृतीयां प्रकृतिं स्त्रीपुंसापेक्षया क्लीबत्वं तृतीयं गतः प्राप्तः। नर इति रलयोर्डलयोश्चाभेदान्नरः। बृहंश्चासौ नरश्चेति नारायणसख आद्यो नर इत्यर्थः । स्त्रीत्वं स्वरूपगोपनार्थम् ॥ २७ ॥ आख्यायिकाः पूर्वराजचरितानि ॥ २८ ॥ समुदाचारं समीचीनमुत्कृष्टतरं महावदान्यत्वादिरूपम् । ताभिः कृतं बहुकर्म च वदन्। मायया कपटक्लीबवेषेण । आत्मानं शरीरमात्मना बुद्ध्या ॥ ३० ॥ परितश्चारयितुं शीलं यस्याः सा परिचारिणी सैव परिचारिका । द्रौपद्या भर्तेति गूढोऽभिसन्धिः । पक्षे परिचारिका सेवाकर्त्री ॥ ३१॥ इति श्रीमहाभारते विराटपर्वणि नैलकण्ठीये भारतभावदीपे द्वितीयोऽध्यायः ॥ २ ॥

× कृतकिणौ–क.

३

इत्येवमिति ॥ १ ॥ परिरक्षणे अश्वानामिति शेषः ॥ ३ ॥ ग्रन्थान्-आयुर्वेदमाध्वर्यवं च वेत्तीति ग्रन्थिकोऽश्विनोः सुतत्वात् । 'आश्विनौ वै देवानां भिषजावश्विनावध्वर्यू' इति श्रुतेः ॥ ४ ॥ अश्वेषु-नास्ति श्वो येषां ते शूराः समरे तृणीकृतप्राणास्तेषु अधिकृतो मुख्य इति गूढाशयः । पक्षे स्पष्टोऽर्थः ॥ ६ ॥ सङ्ख्याने परीक्षायाम् ॥ ८ ॥

तन्तिपाल इति ख्यातो नाम्नाऽहं विदितस्त्वथ।
निपुणं च चरिष्यामि व्येतु ते मानसो ज्वरः॥ ९
अहं हि सततं गोषु भवता प्रहितः पुरा।
तत्र मे कौशलं सर्वमवबुद्धं विशाम्पते॥ १०
लक्षणं चरितं चापि गवां यच्चापि मङ्गलम्।
तत् सर्वं मे सुविदितमन्यच्चापि महीपते॥ ११
वृषभानपि जानामि राजन् पूजितलक्षणान्।
येषां मूत्रमुपाघ्राय अपि वन्ध्या प्रसूयते॥ १२
सोऽहमेवं चरिष्यामि प्रीतिरत्र हि मे सदा।
न च मां वेत्स्यते कश्चित् तोषयिष्ये च पार्थिवम्
युधिष्ठिर उवाच।
इयं हि नः प्रिया भार्या प्राणेभ्योऽपि गरीयसी।
मातेव परिपाल्या च पूज्या ज्येष्ठेव च स्वसा॥१४
केन स्म द्रौपदी कृष्णा कर्मणा विचरिष्यति।
न हि किञ्चिद्विजानाति कर्म कर्तुं यथा स्त्रियः॥
सुकुमारी च बाला च राजपुत्री यशस्विनी।
पतिव्रता महाभागा कथं नु विचरिष्यति॥ १६
माल्यगन्धानलङ्कारान् वस्त्राणि विविधानि च।
एतान्येवाभिजानाति यतो जाता हि भामिनी॥
द्रौपद्युवाच।
सैरन्ध्र्यो रक्षिता लोके भुजिष्याः सन्ति भारत।
नैवमन्याः स्त्रियो यान्ति इति लोकस्य निश्चयः॥
साऽहं ब्रुवाणा सैरन्ध्री कुशला केशकर्मणि॥ १८
युधिष्ठिरस्य गेहे वै द्रौपद्याः परिचारिका।
उषिताऽस्मीति वक्ष्यामि पृष्टा राज्ञा च भारत॥
†आत्मगुप्ता चरिष्यामि यन्मां त्वं परिपृच्छसि२०
सुदेष्णां प्रत्युपस्थास्ये राजभार्यां यशस्विनीम्।
सा रक्षिष्यति मां प्राप्तां मा भूत् ते दुःखमीदृशम्
युधिष्ठिर उवाच।
कल्याणं भाषसे कृष्णे कुले जाताऽसि भामिनि।
न पापमभिजानासि साध्वी साधुव्रते स्थिता २२
यथा न ¶दुर्हृदः पापा भवन्ति सुखिनः पुनः।
कुर्यास्तत् त्वं हि कल्याणि लक्षयेयुर्न ते तथा२३

इति श्रीमहाभारते विराटपर्वणि पाण्डवप्रवेशपर्वणि युधिष्ठिरादिमन्त्रणे
तृतीयोऽध्यायः॥ ३॥

## ४

युधिष्ठिर उवाच।
कर्माण्युक्तानि युष्माभिर्यानि यानि करिष्यथ। मम चापि यथा बुद्धिरुचिता विधिनिश्चयात्॥ १

तन्तिपालस्तान्तिर्बलीवर्दा यस्यां दीर्घस्थूलरज्ज्वां वाणिभिरल्पैर्दामभिर्बध्यन्ते सा प्रकृतोपयोगिनी। गुढाभिसन्धौ तु तन्तिर्वाक्। 'तस्य वाक्तान्तिर्नामानि दामानि' इति श्रुतेर्वा-क्पालो युष्मद्वचनार्थानुष्ठातेत्यर्थः॥ ९॥ इयं हीति। माता लवकुत्तिगादिभूमिर्गौर्वा। 'माता गौर्यादिजननी गोब्रह्माण्यादिभूमिषु' इति मेदिनी। स्वसा आम्बिका। पार्वतीवत्पूज्येत्यर्थः। 'एष ते रुद्रभागः सहस्वस्राम्बिकया तं जुषस्व। शरद्वा अस्याम्बिकास्वसा' इति मन्त्रब्राह्मणदर्शनात्। 'जाया गार्हपत्यः पुत्रोऽन्वाहार्यपचनः' इति तस्या अपि देवतात्वेन संस्तवात्। 'माता सत्यवती भूमिर्धेनुर्ज्येष्ठा स्वसा भवेत्' इत्यप्युदाहरन्ति॥१४॥ बाला नित्यनूतना॥१६॥ यतो यस्मिन् दिने जाता तत आरभ्य माल्यादीन् भोगानेव वेत्ति न क्लेशानित्यर्थः॥१७॥ सैरन्ध्रीति। सीरं प्रतिसीरान्तःपटः ध्रियतेऽनयाऽस्यै वेति सीरन्ध्रा सैव सैरन्ध्री। स्वार्थे ताद्धितः। अन्तःपुरपरिचारिका राजभार्या वा। 'सैरन्ध्री परवेश्मस्था शिल्पकृत्स्ववशा स्त्रियाम्। वर्णसङ्करसंभूतस्त्रीमहिल्लिकयोरपि' इति विश्वः। मतल्लिकयोरिति मेदिनीपाठः। आद्ये महिल्लिका राजादाराः। द्वितीये मतल्लिकाः प्रशस्ताश्च इति। दासीपक्षे अरक्षिता इति छेदः। स्ववशा इत्युक्तेः। पक्षे रक्षिता इत्येव। भुजिष्या पालनीया पालयित्री च। भुज पालनाभ्यवहारयोरित्यस्य रूपम्। नैवमन्याः स्त्रियो रूपवत्यो यान्ति प्राप्नुवन्ति पश्यन्तीतरे इत्यर्थः। दासीरिति भावः। पक्षे नैवं प्रकाशे यान्ति सञ्चरन्तीत्यर्थः॥ १८॥ द्रौपद्याः परिचारिकेति राहोः शिर इतिवदभेदेऽपि भेदोपचारः। द्रौपदीरूपा युधिष्ठिरस्य परिचारिकेत्यर्थः॥१९॥ इति श्रीमहाभारते विराटपर्वणि नैलकण्ठीये भारतभावदीपे तृतीयोऽध्यायः॥ ३॥ † आत्मगुप्ता--स्वयं गुप्ता। ¶ दुर्हृदो विपक्षाः।

---

४

कर्माणीति॥ १॥

पुरोहितोऽयमस्माकमग्निहोत्राणि रक्षतु ।
सूदपौरोगवैः सार्द्धं द्रुपदस्य निवेशने ॥ २
इन्द्रसेनमुखाश्चेमे रथानादाय केवलान् ।
यान्तु द्वारवतीं शीघ्रमिति मे वर्तते मतिः ॥ ३
इमाश्च नार्यो द्रौपद्याः सर्वाश्च परिचारिकाः ।
पाञ्चालानेव गच्छन्तु सूदपौरोगवैः सह ॥ ४
सर्वैरपि च वक्तव्यं न प्राज्ञायन्त पाण्डवाः ।
गता ह्यस्मानपाहाय सर्वे द्वैतवनादिति ॥ ५

वैशम्पायन उवाच ।

एवं तेऽन्योन्यमामन्त्र्य कर्माण्युक्त्वा पृथक् पृथक् ।
धौम्यमामन्त्रयामासुः स च तान् मन्त्रमब्रवीत् ॥ ६

धौम्य उवाच ।

विहितं पाण्डवाः सर्वं ब्राह्मणेषु सुहृत्सु च ।
याने प्रहरणे चैव तथैवाग्निषु भारत ॥ ७
त्वया रक्षा विधातव्या कृष्णायाः फाल्गुनेन च ।
विदितं वो यथा सर्वं लोकवृत्तमिदं तव ॥ ८
विदिते चापि वक्तव्यं सुहृद्भिरनुरागतः ।
एष धर्मश्च कामश्च अर्थश्चैव सनातनः ॥ ९
अतोऽहमपि वक्ष्यामि हेतुमत्र निबोधत ।
हन्तेमां राजवसतिं राजपुत्रा ब्रवीम्यहम् ॥ १०
यथा राजकुलं प्राप्य सर्वान् दोषांस्तरिष्यथ ।
दुर्वसं चैव कौरव्य जानता राजवेश्मनि ॥ ११
अमानितैर्मानितैर्वा अज्ञातैः परिवत्सरम् ।
ततश्चतुर्दशे वर्षे चरिष्यथ यथासुखम् ॥ १२
दृष्टद्वारो लभेद्द्रष्टुं राजस्वेषु न विश्वसेत् ।
तदेवासनमन्विच्छेद्यत्र नाभिपतेत् परः ॥ १३
यो न यानं न पर्यङ्कं न पीठं न गजं रथम् ।
आरोहेत् सम्मतोऽस्मीति स राजवसतिं वसेत्
यत्र यत्रैनमासीनं शङ्केरन् दुष्टचारिणः ।
न तत्रोपविशेद्यो वै स राजवसतिं वसेत् ॥ १५
न चानुशिष्याद्राजानमपृच्छन्तं कदाचन ।
तूष्णीं त्वेनमुपासीत काले समभिपूजयेत् ॥ १६
असूयन्ति हि राजानो जनाननृतवादिनः ।
तथैव चावमन्यन्ते मन्त्रिणं वादिनं मृषा ॥ १७
नैषां दारेषु कुर्वीत मैत्रीं प्राज्ञः कदाचन ।
अन्तःपुरचरा ये च द्वेष्टि यानहिताश्च ये ॥ १८
विदिते चास्य कुर्वीत कार्याणि सुलघून्यपि ।
एवं विचरतो राज्ञि न क्षतिर्जायते क्वचित् ॥ १९
गच्छन्नपि परां भूमिमपृष्टो ह्यनियोजितः ।
जात्यन्ध इव मन्येत मर्यादामनुचिन्तयन् ॥ २०
न हि पुत्रं न नप्तारं न भ्रातरमरिन्दमाः ।
समतिक्रान्तमर्यादं पूजयन्ति नराधिपाः ॥ २१
यत्नाच्चोपचरेदेनमग्निवद्देववत्त्विह ।
अनृतेनोपचीर्णो हि हन्यादेव न संशयः ॥ २२

---

अग्निहोत्राण्यग्निहोत्रपात्राण्यरणीसहितानि होमसाधनभूता धेनूर्वा ॥ २ ॥ न प्राज्ञायन्तेति यथार्थमेव । रहस्येव तैर्मत्स्यदेशे वस्तव्यमिति मन्त्रितत्वात् ॥ ५ ॥ विहितं शास्त्रोक्तं ब्राह्मणादिषु उपस्थितेषु परिचर्यादिकं पाण्डवाः सर्वं जानन्तीति शेषः । याने विजययात्रायां प्रहरणे युद्धे । यद्यप्येवं तथाऽपि किञ्चिद्वक्ष्यामीति भावः ॥ ७ ॥ तदेवाह त्वयेति । त्वया युधिष्ठिरेण । इदं लोकवृत्तं प्राकृतजनशीलमरक्ष्यमाणासु स्त्रीषु साध्वीष्वप्यन्याय्यकल्पनमतः कृष्णा रक्ष्यैवेत्यर्थः ॥ ८ ॥ विद्वांसोऽपि सुहृद्भिः प्रीत्याऽवश्यं बोधनीया एवेत्याह-विदिते चापीति । एवं सौहार्दप्रदर्शनेन धर्मादयोऽनुसृता भवन्तीति भावः ॥ ९ ॥ हन्तेत्यनुकम्पायां राजवसतिं राजकुले वासं तद्विधिमित्यर्थः ॥ १० ॥ दुर्वसं दुःखेन वस्तुं शक्यम् ॥ ११ ॥ दृष्टद्वारः प्रतीहारद्वारा निवेद्यैव राजानं द्रष्टुमिच्छेन्न त्वननुज्ञात इत्यर्थः । दिष्टेत्यपि पाठः । पाठान्तरे रहस्येषु मन्त्रकार्येषु न विश्वसेत् संमतोऽस्मीति बुद्ध्या तत्र न गच्छेत् । पुत्रादिष्वप्यविश्वस्ता राजानो मन्त्रविप्लवभयात् सद्यो मारयेयुरिति भावः । तदेवेति । परेण सह वैरं मा भूदिति परासनं नान्विच्छेत् ॥ १३ ॥ यानं परकीयमिति शेषः ॥ १४ ॥ दुष्टचारिणो दुष्टाचाराः । यत्र यत्र द्यूतमद्यवेश्यादिस्थानेषु स्वनगरस्थपरकीयचारमण्डले वा आसीनमेनं द्यूतादिप्रियोऽयं परैर्भेदितोऽयमिति शङ्केरंस्तत्र नोपविशेत् राजगामिपैशुन्यभयादित्यर्थः ॥ १५ ॥ नानुशिष्यादिदमित्थं कुर्विति नाज्ञापयेत् । तूष्णीं मौनेन । काले पराक्रमसमये । समभिपूजयेत् स्तुवीत ॥ १६ ॥ स्तुतिरप्यभूतार्था न कर्तव्येत्याह-असूयन्तीति । दूषयन्तीत्यर्थः ॥ १७ ॥ येऽन्तःपुरचरा यांश्च राजा द्वेष्टि ये च राज्ञोऽहिता द्वेष्टारस्तैः सर्वैः सह मैत्रीं न कुर्यात् ॥ १८ ॥ राज्ञि राजसन्निधौ विचारतो विचारपूर्वकं वसतो न क्षतिर्मानहान्यादिर्जायते ॥ १९ ॥ गच्छन्निति । परामुत्कृष्टां भूमिं नित्यं गच्छन् आसनार्थं प्राप्नुवन् राज्ञा अपृष्टोऽसम्भाषितोऽनियोजितः स्वे स्थाने उपविशेत्यनाज्ञप्तो जात्यन्ध इव तत्स्थानमपश्यन्तमिवात्मानं मन्येत । यावद्राजा न सम्भाषते नाप्यासनं दिशति तावत्प्रतीक्षेतैवेत्यर्थः ॥ २० ॥ अन्यथा दोषमाह-न हीति ॥ २१ ॥ यत्नादिति । अतिसान्निध्यादग्निरिव राजा दहति । अवज्ञानाद्देव इव सर्वं हरतीत्यर्थः । अनृतेन कूटकार्षापणादिनोपचीर्ण आराधितो हन्यादेव ॥ २२ ॥

यद्यद्भर्ताऽनुयुञ्जीत तत् तदेवानुवर्तयेत् ।
प्रमादमवलेपं च कोपं च परिवर्जयेत् ॥ २३
समर्थनासु सर्वासु हितं च प्रियमेव च ।
संवर्णयेत् तदेवास्य प्रियादपि हितं भवेत् ॥ २४
अनुकूलो भवेच्चास्य सर्वार्थेषु कथासु च ।
अप्रियं चाहितं यत् स्यात्तदस्मै नानुवर्णयेत् २५
नाहमस्य प्रियोऽस्मीति मत्वा सेवेत पण्डितः ।
अप्रमत्तश्च सततं हितं कुर्यात् प्रियं च यत् ॥ २६
नास्यानिष्टानि सेवेत नाहितैः सह संवदेत् ।
स्वस्थानान्न विकम्पेत स राजवसतिं वसेत् ॥२७
दक्षिणं वाऽथ वामं वा पार्श्वमासीत पण्डितः ।
रक्षिणां ह्यात्तशस्त्राणां स्थानं पश्चाद्विधीयते २८
नित्यं हि प्रतिषिद्धं तु पुरस्तादासनं महत् ।
न च संदर्शने किञ्चित् प्रवृत्तमपि सञ्जयेत् २९
अपि ह्येतद्दरिद्राणां व्यलीकस्थानमुत्तमम् ।
न मृषाऽभिहितं राज्ञां मनुष्येषु प्रकाशयेत् ॥३०
असूयन्ति हि राजानो नराननृतवादिनः ।
तथैव चावमन्यन्ते नरान् पण्डितमानिनः ॥ ३१
शूरोऽस्मीति न दृप्तः स्याद्बुद्धिमानिति वा पुनः ।
प्रियमेवाचरन् राज्ञः प्रियो भवति भोगवान् ३२

ऐश्वर्यं प्राप्य दुष्प्रापं प्रियं प्राप्य च राजतः ।
अप्रमत्तो भवेद्राज्ञः प्रियेषु च हितेषु च ॥ ३३
यस्य कोपो महाबाधः प्रसादश्च महाफलः ।
कस्तस्य मनसाऽपीच्छेदनर्थं प्राज्ञसंमतः ॥ ३४
न चोष्ठौ न भुजौ जानू न च वाक्यं समाक्षिपेत्
सदा वातं च वाचं च ष्ठीवनं चाचरेच्छनैः ३५
हास्यवस्तुषु चान्यस्य वर्तमानेषु केषुचित् ।
नातिगाढं प्रहृष्येत न चाप्युन्मत्तवद्धसेत् ॥ ३६
न चातिधैर्येण चरेद्गुरुतां हि व्रजेत् ततः ।
स्मितं तु मृदुपूर्वेण दर्शयेत प्रसादजम् ॥ ३७
लाभे न हर्षयेद्यस्तु न व्यथेद्योऽवमानितः ।
असंमूढश्च यो नित्यं स राजवसतिं वसेत् ॥ ३८
राजानं राजपुत्रं वा संवर्णयति यः सदा ।
अमात्यः पण्डितो भूत्वा स चिरं तिष्ठते प्रियः ३९
प्रगृहीतश्च योऽमात्यो निगृहीतस्त्वकारणैः ।
न निर्वदति राजानं लभते संपदं पुनः ॥ ४०
प्रत्यक्षं च परोक्षं च गुणवादी विचक्षणः ।
उपजीवी भवेद्राज्ञो विषये योऽपि वा भवेत् ॥४१
अमात्यो हि बलाद्भोक्तुं राजानं प्रार्थयत यः ।
न स तिष्ठेच्चिरं स्थानं गच्छेच्च प्राणसंशयम् ॥ ४२

---

भर्ता राजा अनुयुञ्जीत आज्ञापयेत् पृच्छेद्वा। अनुवर्तयेत् कुर्यात् वदेद्वा। प्रमादमनवधानताम्। अवलेपं शौर्यादिगर्वम् ॥२३॥ समर्थनासु कार्याकार्यपरीक्षासु हितं पारिणामसुखं प्रियं श्रुतिसुखं च वदेत्। उभयोः समुच्चयासंभवे प्रियादपि हितं भवेत् प्रियं त्यक्त्वापि यद्धितं भवेत्तदेव वदेन्न तु हितविरोधि प्रियं वदेदित्यर्थः॥२४॥अस्य सर्वार्थेषु सर्वेष्वर्थसाधनेषु अनुकूलो यत्नवान् भवेत् न तु प्रातिकूल्यमालस्यं वा कुर्यादित्यर्थः॥२५॥ पण्डितः परिहासकः। 'पण्डितः सिल्हके कवौ' इति विश्वः। 'खण्डितः' इति पाठे विच्छिद्य न सेवेत किं त्वविच्छेदेनैव सेवेतेत्यर्थः। अप्रमत्तोऽवहितः ॥ २६ ॥ स्वस्थानात् राजदत्तान्न विकम्पेत न चलेत् ॥ २७ ॥ पण्डितो विद्यावान् राजानं कथाभी रमयन् पार्श्वे तिष्ठेत्। रक्षिणां राजगोप्तॄणां तु स्थानं पृष्ठतः ॥ २८ ॥ शूरेण पण्डितेन वा पुरस्तात् आसनमुपवेशनं न कर्तव्यमित्यर्थः। राज्ञां सन्दर्शने समक्षं प्रवृत्तमपि भक्तवेतनादिदानमहंपूर्विकयानाकारितः सन् न सञ्जयेत् स्वीकुर्यात् ॥ २९ ॥ एतत्तु धार्ष्ट्यं दरिद्राणामपि व्यलीकस्थानमप्रियपदं किमुत राज्ञामिति भावः। उत्तमं परमं नेति राज्ञोदितमनृतं बहिर्न प्रकाशयेत् ॥ ३० ॥ हि यस्मात् अनृतवादिनो नृपान् हि यतोऽन्ये राजानोऽसूयन्ति दोषवत्त्वेन कीर्तयन्ति। तस्मात् स्वामिनोऽकीर्तिकरं न वदेदित्यर्थः। अवमन्यन्ते राजान इति शेषः ॥३१॥ प्रियो भोगवांश्च भवतीति सम्बन्धः ॥ ३२ ॥ न चेति। क्रोधचापलयोः सूचकमोष्ठादीनां समाक्षेपं प्रचालनं न कुर्यादित्यर्थः। वातं मुखजमधस्तनं वा शनैरितरणाज्ञातं यथा भवेत्तथा कुर्यादित्यर्थः ॥ ३५ ॥ हास्येति। अन्यस्य राजसेवकस्य हास्यवस्तुषु हास्यास्पदेष्वयथास्थितेषु उष्णीषादिषु वर्तमानेषु निमित्तेषु तदीयवैकल्येनातिगाढं न प्रहृष्येत् नापि हसेत्। तावतैव राजान एनं क्षुद्रं मन्यन्त इति भावः। न चैवंभूते निमित्ते सति धैर्येण काष्ठवत् स्थेयमित्याह नातीति ॥ ३६ ॥ गुरुतां जडतां किमप्ययं न जानातीति वदेयुरिति भावः। अत एव स्मितं मृदुपूर्वं किंचिद्दर्शयेदेव ॥ ३७ ॥ न हर्षयेत् हृष्येत्। असंमूढः सेवायामेकाग्रः ॥ ३८ ॥ राजा तदाश्रिताश्च स्तोतव्या एवेत्याह–राजानमिति। संवर्तयतीति पाठेऽनुसरति। तिष्ठते प्रकाशते ॥३९॥ न निर्वदति न निन्दति। दण्डितोऽप्यमात्यः पुनरभ्युदयकामो राजानं न निन्देदित्यर्थः ॥ ४० ॥ यो राज्ञो विषये भवेत् देशे वसेत् यो वा राज्ञ उपजीवी स राज्ञो गुणवादी स्यादिति सम्बन्धः ॥ ४१ ॥ बलाद्धठात् भोक्तुं कुटिलीकर्तुं येन केनचिद्व्याजेन लोकान् दण्डयेति शिक्षयन् यः प्रार्थयेत् स राज्ञः प्रियोऽपि बहुजनविरोधाच्चिरं स्थानं पदं न

श्रेयः सदाऽऽत्मनो दृष्ट्वा परं राज्ञा न संवदेत् ।
विशेषयेच्च राजानं योग्यभूमिषु सर्वदा ॥ ४३
अम्लानो बलवान् शूरश्छायेवानुगतः सदा ।
सत्यवादी मृदुर्दान्तः स राजवसतिं वसेत् ॥ ४४
अन्यस्मिन् प्रेष्यमाणे तु पुरस्ताद्यः समुत्पतेत् ।
अहं किं करवाणीति स राजवसतिं वसेत् ४५
आन्तरे चैव बाह्ये च राज्ञा यश्चाथ सर्वदा ।
आदिष्टो नैव कम्पेत स राजवसतिं वसेत् ॥ ४६
यो वै गृहेभ्यः प्रवसन् प्रियाणां नानुसंस्मरेत् ।
दुःखेन सुखमन्विच्छेत् स राजवसतिं वसेत् ४७
समवेषं न कुर्वीत नोच्चैः सन्निहितो वसेत् ।
न मन्त्रं बहुधा कुर्यादेवं राज्ञः प्रियो भवेत् ॥ ४८
न कर्मणि नियुक्तः सन् धनं किञ्चिदपि स्पृशेत् ।
प्राप्नोति हि हरन् द्रव्यं बन्धनं यदि वा वधम् ॥
यानं वस्त्रमलङ्कारं यच्चान्यत् सम्प्रयच्छति ।
तदेव धारयेन्नित्यमेवं प्रियतरो भवेत् ॥ ५०
एवं संयम्य चित्तानि यत्नतः पाण्डुनन्दनाः ।
संवत्सरमिमं तात तथाशीला ×बुभूषत ।
अथ स्वविषयं प्राप्य यथाकामं †करिष्यथ ॥५१

युधिष्ठिर उवाच ।

अनुशिष्टाः स्म भद्रं ते नैतद्वक्ताऽस्ति कश्चन ।
कुन्तीमृते मातरं नो विदुरं वा महामतिम् ॥ ५२
यदेवानन्तरं कार्यं तद्भवान् कर्तुमर्हति ।
तारणायास्य दुःखस्य प्रस्थानाय जयाय च ॥५३

वैशम्पायन उवाच ।

एवमुक्तस्ततो राज्ञा धौम्योऽथ द्विजसत्तमः ।
अकरोद्विधिवत् सर्वं प्रस्थाने यद्विधीयते ॥ ५४
तेषां समिध्य तानग्नीन् मन्त्रवच्च जुहाव सः ।
समृद्धिवृद्धिलाभाय पृथिवीविजयाय च ॥ ५५
अग्नीन् प्रदक्षिणीकृत्य ब्राह्मणांश्च तपोधनान् ।
याज्ञसेनीं पुरस्कृत्य +षडेवाथ प्रवव्रजुः ॥ ५६
गतेषु तेषु वीरेषु धौम्योऽथ जपतां वरः ।
अग्निहोत्राण्युपादाय पाञ्चालानभ्यगच्छत ॥ ५७
इन्द्रसेनादयश्चैव यथोक्ताः प्राप्य यादवान् ।
रथानश्वांश्च रक्षन्तः सुखमूषुः सुसंवृताः ॥ ५८

इति श्रीमहाभारते विराटपर्वणि पाण्डवप्रवेशपर्वणि धौम्योपदेशे चतुर्थोऽध्यायः ॥ ४ ॥

तिष्ठेत् नाधितिष्ठेत्। अवश्यं पदच्युतो भवेदित्यर्थः । भोक्तुमिति । भुज कौटिल्ये इत्यस्य रूपम्॥४२॥ श्रेय इति । राज्ञः सकाशादात्मनः स्वस्य श्रेयो धनमानादिलाभं दृष्ट्वा परमन्यं सदा सर्वदा राज्ञा सार्द्धं न संवदेन्न संवादयेत् किं तु महाराजो न भवादृशान्मन्त्रे लक्षयतीत्येव लोके परं दर्शयेत् । योग्यभूमिषु युद्धे परराष्ट्रिकैः सह संलापे वा राजानं विशेषयेत् राज्ञोऽपेक्षया स्वीयं शौर्यं यौक्तिकत्वं वाऽधिकं दर्शयेत्। तेन राजा प्रीयत इति भावः ॥ ४३ ॥ अम्लान उत्साही बलवान् धीबलयुक्तः । मृदुरनिष्ठुरः दान्तो जितेन्द्रियः सुशिक्षितो वा ॥ ४४ ॥ अन्यस्मिन् पुंसि कस्याचित् कार्यस्यार्थे प्रेष्यमाणे एहि इदं कुर्वित्युच्यमाने सति यस्तदागमनात् पूर्वं समुत्पतेत्तत्कार्यं कर्तुं स शीघ्रकारी राजवसतिं वसेत् ॥४५॥ आन्तरे–वनदारसंरक्षणादौ बाह्ये–सामन्तजये आदिष्ट आज्ञप्तो नैव कम्पेत नैव संशयं भयं वा कुर्यात् । निःसंशयो निर्भयश्च तत्कार्यं कुर्यादेवेत्यर्थः ॥ ४६ ॥ प्रियाणां प्रियाणि स्त्रीपुत्रान्नपानादिसुखानि दुःखेन प्रवासादिना ॥ ४७ ॥ समवेषं वस्त्रालङ्कारादिकं राज्ञा समानं न । उच्चैः अतिशयेन । बहुधा बहुप्रकारं न कुर्यात् न भिन्द्यादित्यर्थः ॥ ४८ ॥ धनमुत्कोचादिना प्राप्तं किञ्चिदप्यत्यल्पमपि न स्पृशेत् ॥ ४९ ॥ यत् सम्प्रयच्छति राजा तदेव राजदत्तं यानादिकं धारयेत् न तु तदन्यस्मै दद्यादित्यर्थः ॥ ५० ॥ संयम्य निगृह्य इमं त्रयोदशं संवत्सरम् । हे तात युधिष्ठिर यूयं सर्वे तथाशीला यथोक्तसद्वृत्ताः सन्तो बुभूषत ऐश्वर्यं प्राप्तुमिच्छथ । अथ अनन्तरं स्वविषयं स्वदेशं प्राप्य यथाकामं यथेष्टं करिष्यथ क्रीडामिति शेषः ॥ ५१ ॥ अनन्तरमनुपदं कार्यं शान्तिकं पौष्टिकं चास्य अज्ञातवासदुःखस्य तारणाय प्रस्थानाय शत्रून्प्रति योद्धुं गमनाय जयाय च यत्कर्म प्रभवति तत्कर्तुमर्हति ॥ ५३ ॥ समिध्य उद्दीप्य। समृद्धिर्जनाभिसम्पत्तिः। वृद्धिर्युद्धे विशेषः। लाभो राज्यस्य। लब्धाया अपि पृथिव्या विजयाय वशीकरणाय ॥ ५५ ॥ षट् द्रौपद्या सहिताः ॥५६॥ इति श्रीमहाभारते विराटपर्वणि नैलकण्ठीये भारतभावदीपे चतुर्थोऽध्यायः ॥४॥

× बुभूषवः–क. † चरिष्यथ–क. + पाण्डवास्ते–घ.

## ५

वैशम्पायन उवाच ।

ते वीरा बद्धनिस्त्रिंशास्तथा बद्धकलापिनः ।
बद्धगोधाङ्गुलित्राणाः *कालिन्दीमभितो ययुः १
ततस्ते दक्षिणं तीरमन्वगच्छन् पदातयः ।
निवृत्तवनवासा हि स्वराष्ट्रं प्रेप्सवस्तदा ।
वसन्तो गिरिदुर्गेषु वनदुर्गेषु धन्विनः ॥ २
विध्यन्तो मृगजातानि महेष्वासा महाबलाः ।
उत्तरेण दशार्णांस्ते पञ्चालान् दक्षिणेन च ॥ ३
अन्तरेण यकृल्लोमान् शूरसेनांश्च पाण्डवाः ।
लुब्धा ब्रुवाणा मत्स्यस्य विषयं प्राविशन् वनात्
धन्विनो बद्धनिस्त्रिंशा विवर्णाः श्मश्रुधारिणः ।
ततो जनपदं प्राप्य कृष्णा राजानमब्रवीत् ॥ ५
पश्यैकपद्यो दृश्यन्ते क्षेत्राणि विविधानि च ।
व्यक्तं दूरे विराटस्य राजधानी भविष्यति ।
वसामेहापरां रात्रिं बलवान् मे परिश्रमः ॥ ६

युधिष्ठिर उवाच ।

धनञ्जय समुद्यम्य पाञ्चालीं वह भारत ।
राजधान्यां निवत्स्यामो विमुक्ताश्च वनादितः ७

वैशम्पायन उवाच ।

तामादायार्जुनस्तूर्णं द्रौपदीं गजराडिव ।
संप्राप्य नगराभ्याशमवतारयदर्जुनः ॥ ८
स राजधानीं संप्राप्य कौन्तेयोऽर्जुनमब्रवीत् ।
क्वायुधानि समासज्य प्रवेक्ष्यामः पुरं वयम् ॥ ९
सायुधाश्च प्रवेक्ष्यामो वयं तात पुरं यदि ।
समुद्वेगं जनस्यास्य करिष्यामो न संशयः ॥ १०
गाण्डीवं च महद्गाढं लोके च विदितं नृणाम् ।
तच्चेदायुधमादाय गच्छामो नगरं वयम् ।
क्षिप्रमस्मान्विजानीयुर्मनुष्या नात्र संशयः ॥ ११
ततो द्वादश वर्षाणि प्रवेष्टव्यं वने पुनः ।
एकस्मिन्नपि विज्ञाते प्रतिज्ञातं हि नस्तथा ॥ १२

अर्जुन उवाच ।

इयं कूटे मनुष्येन्द्र गहना महती शमी ।
भीमशाखा दुरारोहा श्मशानस्य समीपतः ॥ १३
न चापि विद्यते कश्चिन्मनुष्य इति मे मतिः ।
योऽस्मान्निदधतो द्रष्टा भवेच्छस्त्राणि पाण्डवाः
उत्पथे हि वने जाता मृगव्यालनिषेविते ।
समीपे च श्मशानस्य गहनस्य विशेषतः ॥ १५
समाधायायुधं शम्यां गच्छामो नगरं प्रति ।
एवमत्र यथायोगं विहरिष्याम भारत ॥ १६

वैशम्पायन उवाच ।

एवमुक्त्वा स राजानं धर्मराजं युधिष्ठिरम् ।
प्रचक्रमे निधानाय शस्त्राणां भरतर्षभ ॥ १७
येन देवान् मनुष्यांश्च सर्वांश्चैकरथोऽजयत् ।
स्फीतान् जनपदांश्चान्यानजयत् कुरुपुङ्गवः ॥ १८
तदुदारं महाघोषं संपन्नबलसूदनम् ।
अपज्यमकरोत् पार्थो गाण्डीवं सुभयंकरम् ॥ १९
येन वीरः कुरुक्षेत्रमभ्यरक्षत् परन्तपः ।
अमुञ्चद्धनुषस्तस्य ज्यामक्षय्यां युधिष्ठिरः ॥ २०
पाञ्चालान् येन सङ्ग्रामे भीमसेनोऽजयत् प्रभुः ।
प्रत्यषेधद्बहूनेकः सपत्नांश्चैव दिग्जये ॥ २१
निशम्य यस्य विस्फारं व्यद्रवन्त रणात् परे ।
पर्वतस्येव दीर्णस्य विस्फोटमशनेरिव ॥ २२
सैन्धवं येन राजानं पर्यामृषितवानथ ।
ज्यापाशं धनुषस्तस्य भीमसेनोऽवतारयत् ॥ २३
अजयत् पश्चिमामाशां धनुषा येन पाण्डवः ।
माद्रीपुत्रो महाबाहुस्ताम्रास्यो मितभाषिता २४
तस्य मौर्वीमपाकर्षच्छूरः संक्रन्दनो युधि ।
कुले नास्ति समो रूपे यस्येति नकुलः स्मृतः २५
दक्षिणां दक्षिणाचारो दिशं येनाजयत् प्रभुः ।
अपज्यमकरोद्वीरः सहदेवस्तदायुधम् ॥ २६

---

५

**ते वीरा** इति। निस्त्रिंशः खड्गः। कलापिनस्तूणवन्तः। तता-युधेति पाठे सज्जीकृतधनुषः ततायुधाश्च ते कलापिनश्चेति विग्रहः। बद्धं गोधातलं ज्याघातवारणाख्यमङ्गुलित्राणं च यैस्ते बद्धगोधाङ्गुलित्राणाः 'गोधा तलनिहाकयोः' इति मेदिनी ॥ १ ॥ अन्तरेण मध्यतः मत्स्यस्यैव राज्ञो लुब्धा व्याधाः स्म इति ब्रुवाणाः। पक्षे राज्याकाङ्क्षिणः। 'लुब्ध आकाङ्क्षिणि व्याधे' इति मेदिनी। विषयं मत्स्यस्यैव देशम् ॥ ४ ॥ लुब्धत्वाभिमानाय विवर्णाः ॥ ५ ॥ एकपद्यः क्षेत्रगामिनः क्षुद्रमार्गाः ॥ ६ ॥ कूटे इव कूटे उच्चप्रदेशे। 'मायाद्रिशृङ्गयोः कूटम्' इति मेदिनी। दुरारोहा श्मशानस्थत्वात् ॥ १३ ॥ उत्पथे मार्गाद्बहिर्भूते ॥ १५ ॥ संपन्नबलानां देवाराधनप्राप्तबलानामसुरादीनामपि सूदनम् ॥ १९ ॥ सैन्धवं जयद्रथम् ॥ २३ ॥ संक्रन्दनः शत्रूणामाक्रन्दनकरः ॥ २५ ॥ अपज्यं ज्यारहितम् ॥ २६ ॥ * यमुनानिकटं गता इत्यर्थः ।

खड्गांश्च दीप्तान् दीर्घांश्च कलापांश्च महाधनान् ।
विपाठान् क्षुरधारांश्च धनुर्भिर्निदधुः सह ॥ २७

वैशम्पायन उवाच ।

अथान्वशासन्नकुलं कुन्तीपुत्रो युधिष्ठिरः ।
आरुह्येमां शमीं वीर धनूंष्येतानि निक्षिप ॥ २८
तामुपारुह्य नकुलो धनूंषि निदधे स्वयम् ।
यानि तस्या वकाशानि दिव्यरूपाण्यमन्यत २९
यत्र चापश्यत स वै तिरोवर्षाणि वर्षति ।
तत्र तानि दृढैः पाशैः सुगाढं पर्यबन्धत ॥ ३०
शरीरं च मृतस्यैकं समबध्नन्त पाण्डवाः ।
विवर्जयिष्यन्ति नरा दूरादेव शमीमिमाम् ॥ ३१
आबद्धं शवमत्रेति गन्धमाघ्राय पूतिकम् ।
अशीतिशतवर्षेयं माता न इति वादिनः ॥ ३२
कुलधर्मोऽयमस्माकं पूर्वैराचरितोऽपि वा ।
समासज्याथ वृक्षेऽस्मिन्निति वै व्याहरन्ति ते ॥
आगोपालाविपालेभ्य आचक्षाणाः परंतपाः ।
आजग्मुर्नगराभ्याशं पार्थाः शत्रुनिबर्हणाः ॥ ३४
जयो जयन्तो विजयो जयत्सेनो जयद्बलः ।
इति गुह्यानि नामानि चक्रे तेषां युधिष्ठिरः ॥ ३५
ततो यथाप्रतिज्ञाभिः प्राविशन्नगरं महत् ।
अज्ञातचर्यां वत्स्यन्तो राष्ट्रे वर्षं त्रयोदशम् ॥ ३६

इति श्रीमहाभारते विराटपर्वणि पाण्डवप्रवेशपर्वणि पुरप्रवेशे अस्त्रसंस्थापने पञ्चमोऽध्यायः ॥ ५ ॥

## ६

वैशम्पायन उवाच ।

विराटनगरं रम्यं गच्छमानो युधिष्ठिरः ।
अस्तुवन्मनसा देवीं दुर्गां त्रिभुवनेश्वरीम् ॥ १
यशोदागर्भसंभूतां नारायणवरप्रियाम् ।
नन्दगोपकुले जातां मङ्गल्यां कुलवर्धिनीम् ॥ २
कंसविद्रावणकरीमसुराणां क्षयंकरीम् ।
शिलातटविनिक्षिप्तामाकाशं प्रति गामिनीम् ३
वासुदेवस्य भगिनीं दिव्यमाल्यविभूषिताम् ।
दिव्याम्बरधरां देवीं खड्गखेटकधारिणीम् ॥ ४
भारावतरणे पुण्ये ये स्मरन्ति सदा शिवाम् ।
तान् वै तारयते पापात् पङ्के गामिव दुर्बलाम् ५
स्तोतुं प्रचक्रमे भूयो विविधैः स्तोत्रसंभवैः ।
आमन्त्र्य दर्शनाकाङ्क्षी राजा देवीं सहानुजः ॥ ६
नमोऽस्तु वरदे कृष्णे कुमारि ब्रह्मचारिणि ।
बालार्कसदृशाकारे पूर्णचन्द्रनिभानने ॥ ७
चतुर्भुजे चतुर्वक्त्रे पीनश्रोणिपयोधरे ।
मयूरपिच्छवलये केयूराङ्गदधारिणि ॥ ८
भासि देवि यथा पद्मा नारायणपरिग्रहः ॥
स्वरूपं ब्रह्मचर्यं च विशदं तव खेचरि ।
कृष्णच्छविसमा कृष्णा सङ्कर्षणसमानना ॥ ९

विपाठान् बाणविशेषान् तादृशान् क्षुरधारांश्च ॥ २७ ॥ अन्वशासत् अज्ञापितवान् ॥ २८ ॥ तस्याः शम्याः वकाशानि [1]भागुरिमतेन अलोपः । अवकाशाख्यानि सुषिरस्थानानि ॥ २९ ॥ वर्षति मेघः तिरोवर्षाणि असंमुखानि वर्षाणि वृष्टीः यत्रापश्यत तत्र पर्यबन्धत पर्यबध्नात् ॥ ३० ॥ पूतिकममङ्गलम् । अशीत्यधिकशतवर्षा नोऽस्माकमियं भवति शवनिर्देशः। पक्षे शमी आयुधरक्षकत्वात् मातेवास्माकमित्यभिसन्धिः ॥ ३२ ॥ कुलधर्मोऽयं क्षत्रधर्मोऽयं यदायुधसङ्गोपनमिति गूढ आशयः। पक्षे अयं मातुर्वृक्षे बन्धनाख्यः ॥ ३३ ॥ वत्स्यन्तो वस्तुमिच्छन्तः ॥ ३६ ॥ इति श्रीमहाभारते विराटपर्वणि नैलकण्ठीये भारतभावदीपे पञ्चमोऽध्यायः ॥ ५ ॥

[1] 'वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः ' इति ।

६

विराट इति । गच्छमानः गच्छन् दुर्गां दुर्गमसंकटतारिणीम् ॥ १ ॥ नारायणेन दत्ता ये वराः उमेति भद्रकालीति देवास्त्वां पूजयिष्यन्तीत्येवमादयो विष्णुपुराणादौ श्रुतास्तैः प्रियां मङ्गल्यां मङ्गलप्रदाम् ॥ २ ॥ शिलातटे कंसेनैव विनिक्षिप्ता सती आकाशं गता ताम् ॥ ३ ॥ खेटकं चर्म ॥ ४ ॥ वरदेत्यादीनां तैः स्तोत्रार्थमेव संभव उद्भवो येषां नाम्नां स्तोत्रार्थमेव संभव उद्भवो प्रचक्रमे इति पूर्वेण सम्बन्धः आमन्त्र्य सम्बोध्य स्तोतुं ॥ ६ ॥ कृष्णे कृष्णस्वरूपे ॥ ७ ॥ चतुर्भुजे चतुर्वक्त्रे इति विष्णुब्रह्मरूपत्वमुक्तम् । मयूरपिच्छानि इन्द्रनीलादिमणिखचितानि वलयानि यस्यास्तथा विधे । पद्मा लक्ष्मीः अत एव नारायणपरिग्रहो विष्णुकान्ता ॥ ८ ॥ ब्रह्मचर्यमित्यन्यगामित्वं दर्शितम् । तेन लौकिकलक्ष्मीतो व्यावृत्तिः । कृष्णच्छविर्नीलमेघस्तेन समा कृष्णा कृष्णवर्णा ॥ ९ ॥

बिभ्रती विपुलौ बाहू शक्रध्वजसमुच्छ्रयौ ।
पात्री च पङ्कजी घण्टी स्त्रीविशुद्धा च या भुवि
पाशं धनुर्महाचक्रं विविधान्यायुधानि च ।
कुण्डलाभ्यां सुपूर्णाभ्यां कर्णाभ्यां च विभूषिता
चन्द्रविस्पर्धिना देवि मुखेन त्वं विराजसे ।
मुकुटेन विचित्रेण केशबन्धेन शोभिना ॥ १२
भुजङ्गाभोगवासेन श्रोणिसूत्रेण राजता ।
विभ्राजसे चाबद्धेन भोगेनेवेह मन्दरः ॥ १३
ध्वजेन शिखिपिच्छानामुच्छ्रितेन विराजसे ।
कौमारं व्रतमास्थाय त्रिदिवं पावितं त्वया ॥ १४
तेन त्वं स्तूयसे देवि त्रिदशैः पूज्यसेऽपि च ।
त्रैलोक्यरक्षणार्थाय महिषासुरनाशिनि ।
प्रसन्ना मे सुरश्रेष्ठे दयां कुरु शिवा भव ॥ १५
जया त्वं विजया चैव संग्रामे च जयप्रदा ।
ममापि विजयं देहि वरदा त्वं च साम्प्रतम् १६
विन्ध्ये चैव नगश्रेष्ठे तव स्थानं हि शाश्वतम् ।
कालि कालि महाकालि सीधुमांसपशुप्रिये॥१७
कृतानुयात्रा भूतैस्त्वं वरदा कामचारिणि ।
भारावतारे ये च त्वां संस्मरिष्यन्ति मानवाः॥
प्रणमन्ति च ये त्वां हि प्रभाते तु नरा भुवि ।
न तेषां दुर्लभं किञ्चित् पुत्रतो धनतोऽपि वा१९
दुर्गात् तारयसे दुर्गे तत् त्वं दुर्गा स्मृता जनैः ।
कान्तारेष्ववसन्नानां मग्नानां च महार्णवे ॥ २०
दस्युभिर्वा निरुद्धानां त्वं गतिः परमा नृणाम् ।
जलप्रतरणे चैव कान्तारेष्वटवीषु च ॥ २१
ये स्मरन्ति महादेवि न च सीदन्ति ते नराः ।
त्वं कीर्तिः श्रीर्धृतिः सिद्धिर्ह्रीर्विद्या सन्ततिर्मतिः
सन्ध्या रात्रिः प्रभा निद्रा
ज्योत्स्ना कान्तिः क्षमा दया ।
नृणां च बन्धनं मोहं पुत्रनाशं धनक्षयम् ॥ २२
व्याधिं मृत्युं भयं चैव पूजिता नाशयिष्यसि ।
सोऽहं राज्यात् परिभ्रष्टः शरणं त्वां प्रपन्नवान्॥
प्रणतश्च यथा मूर्ध्ना तव देवि सुरेश्वरि ।
त्राहि मां पद्मपत्राक्षि सत्ये सत्या भवस्व नः२५
शरणं भव मे दुर्गे शरण्ये भक्तवत्सले ।
एवं स्तुता हि सा देवी दर्शयामास पाण्डवम् ॥
उपगम्य तु राजानमिदं वचनमब्रवीत् ।

देव्युवाच ।

श्रृणु राजन् महाबाहो मदीयं वचनं प्रभो ॥ २७
भविष्यत्यचिरादेव संग्रामे विजयस्तव ।
मम प्रसादान्निर्जित्य हत्वा कौरववाहिनीम्॥ २८
राज्यं निष्कण्टकं कृत्वा भोक्ष्यसे मेदिनीं पुनः ।
भ्रातृभिः सहितो राजन्
प्रीतिं प्राप्स्यसि पुष्कलाम् ॥ २९
मत्प्रसादाच्च ते सौख्यमारोग्यं च भविष्यति ।
ये च संकीर्तयिष्यन्ति लोके विगतकल्मषाः ३०
तेषां तुष्टा प्रदास्यामि राज्यमायुर्वपुः सुतम् ।
प्रवासे नगरे चापि संग्रामे शत्रुसंकटे ॥ ३१
अटव्यां दुर्गकान्तारे सागरे गहने गिरौ ।
ये स्मरिष्यन्ति मां राजन् यथाऽहं भवता स्मृता
न तेषां दुर्लभं किञ्चिदस्मिँल्लोके भविष्यति ।
इदं स्तोत्रवरं भक्त्या श्रृणुयाद्वा पठेत वा ॥ ३३
तस्य सर्वाणि कार्याणि
सिद्धिं यास्यन्ति पाण्डवाः ।
मत्प्रसादाच्च वः सर्वान् विराटनगरे स्थितान्॥३४
न प्रज्ञास्यन्ति कुरवो नरा वा तन्निवासिनः ।
इत्युक्त्वा वरदा देवी युधिष्ठिरमरिन्दमम् ।
रक्षां कृत्वा च पाण्डूनां तत्रैवान्तरधीयत ॥ ३५

इति श्रीमहाभारते विराटपर्वणि पाण्डवप्रवेशपर्वणि दुर्गास्तवे
षष्ठोऽध्यायः ॥ ६ ॥

---

अष्टभुजामाह–बिभ्रतीति । विपुलौ वराभयप्रदत्वेन ऊर्जितौ द्वौ बाहू । तत एकः पात्री पात्रवान् । पङ्कजी पङ्कजवान् । घण्टी घण्टावान् पञ्चमः॥१०॥ पाशं धनुर्महाचक्रं च बिभ्रतीति पूर्वेणान्वयः । एतान्येव विविधान्यायुधानि कुण्डलपूर्णौ यौ द्वौ कर्णौ ताभ्यां विराजिता ॥ ११ ॥ केशबन्धेन कबरीरूपेण ॥१२॥ वेणीं वर्णयति–भुजङ्गेति । भुजङ्गाभोगवासेन सर्पशरीराकारेण वासो वासना तेन तदाकार उपलक्ष्यते। कटिसूत्रेण सह राजता शोभमानेन कटिसूत्रोपरि लम्बमानया वेण्येत्यर्थः। भोगेन भुजङ्गफणया तद्वा भुजङ्गेनेत्यर्थः। भोगिनेवेति युक्तः पाठः॥१३॥ शिवा कल्याणरूपा ॥१५॥ कृतानुयात्रा नित्यमनुसृता भूतैर्ब्रह्माद्यैः प्राचीनैः ॥ १८ ॥ कान्तारे महारण्ये॥२०॥ कान्तारे दुर्गममार्गे॥२१॥ संकीर्तयिष्यन्ति मामिति शेषः॥३०॥ इति श्रीमहा० विराटपर्वणि नैलकण्ठीये भारतभावदीपे दुर्गास्तवः षष्ठोऽध्यायः ॥ ६ ॥

## ७

वैशम्पायन उवाच ।

ततो विराटं प्रथमं युधिष्ठिरो
राजा सभायामुपविष्टमाव्रजत् ।
वैदूर्यरूपान् प्रतिमुच्य काञ्चना-
नक्षान् स कक्षे परिगृह्य वाससा ॥ १

नराधिपो राष्ट्रपतिं यशस्विनं
महायशाः कौरववंशवर्धनः ।
महानुभावो नरराजसत्कृतो
दुरासदस्तीक्ष्णविषो यथोरगः ॥ २

बलेन रूपेण नरर्षभो महा-
नपूर्वरूपेण यथामरस्तथा ।
महाभ्रजालैरिव संवृतो रवि-
र्यथाऽनलो भस्मवृतश्च वीर्यवान् ॥ ३

तमापतन्तं प्रसमीक्ष्य पाण्डवं
विराटराडिन्दुमिवाभ्रसंवृतम् ।
समागतं पूर्णशशिप्रभाननं
महानुभावं नचिरेण दृष्टवान् ॥ ४

मन्त्रिद्विजान् सूतमुखान्विशस्तथा
ये चापि केचित् परितः समासते ।
पप्रच्छ कोऽयं प्रथमं समेयिवान्
नृपोपमोऽयं समवेक्षते सभाम् ॥ ५

स तु द्विजोऽयं भविता नरोत्तमः
पतिः पृथिव्या इति मे मनोगतम् ।
न चास्य दासो न रथो न कुञ्जरः
समीपतो भ्राजति चायमिन्द्रवत् ॥ ६

शरीरलिङ्गैरुपसूचितो ह्ययं
मूर्द्धाभिषिक्त इति मे मनोगतम् ।
समीपमायाति च मे गतव्यथो
यथा गजस्तामरसीं मदोत्कटः ॥ ७

वितर्कयन्तं तु नरर्षभस्तथा
युधिष्ठिरोऽभ्येत्य विराटमब्रवीत् ।
सम्राड्विजानात्विह जीवनार्थिनं
विनष्टसर्वस्वमुपागतं द्विजम् ॥ ८

इहाहमिच्छामि तवानघान्तिके
वस्तुं यथा कामचरस्तथा विभो ।
तमब्रवीत् स्वागतमित्यनन्तरं
राजा प्रहृष्टः प्रतिसंगृहाण च ॥ ९

तं राजसिंहं प्रतिगृह्य राजा
प्रीत्याऽऽत्मना चैनमिदं बभाषे ।
कामेन ताताभिवदाम्यहं त्वां
कस्यासि राज्ञो विषयादिहागतः ॥ १०

गोत्रं च नामापि च शंस तत्त्वतः
किं चापि शिल्पं तव विद्यते कृतम् ११

युधिष्ठिर उवाच ।

युधिष्ठिरस्यासमहं पुरा सखा
वैयाघ्रपद्यः पुनरस्मि विप्रः ।
अक्षान् प्रयोक्तुं कुशलोऽस्मि देविनां
कङ्केति नाम्नाऽस्मि विराट विश्रुतः॥१२

---

७

तत इति । वैदूर्यरूपान् काञ्चनांश्च शारीन् इदं श्वेतरक्त-शारीणां शारिफलकस्य चोपलक्षणमक्षान् पाशांश्च वाससा प्रतिमुच्य बध्वा कक्षे परिगृह्य आव्रजदिति सम्बन्धः॥ १ ॥ नचिरेण शीघ्रमेव ॥ ४ ॥ विशो वैश्यान् ॥ ५ ॥ न तु द्विजोऽयं द्विजवेषोऽपि राजैव भविष्यतीत्यर्थः ॥ ६ ॥ शरीरलिङ्गैः आजानुबाहुत्वादिभिः तामरसीं पद्मिनीम् । एतेन स्वाभिभवशङ्का दर्शिता ॥ ७ ॥ द्विजं त्रैवर्णिकत्वात् ॥ ८ ॥ कामचरः त्वदिच्छानुवर्ती ॥ ९ ॥ प्रीत्याऽऽत्मना प्रीतिमता मनसा कामेन रागेण तातेति श्रेष्ठत्वात् सम्बोधयति ॥ १० ॥ शिल्पं कौशलं किं विषयं तव त्वया कृतं संपादितम् ॥ ११ ॥ युधिष्ठिरस्येति लोके । पक्षे युधिष्ठिरोऽहं तव सखा स्यासं भूयासमिति सम्बन्धः । अस्तेराशीर्लिङि छान्दस आर्द्धधातुकत्वाभावः । तेन भूभावः श्नसोरित्यल्लोपाभावश्च न भवतः सलोपाभावोऽपि छान्दसः । युधिष्ठिरः स्या हमहं सखेति पाठेऽपि युधिष्ठिरोऽहं मम सखा स्याः भव इति सम्बन्धः । हमिति तु पादपूरणार्थो निपातः । पक्षे अहमहमिति द्विरुक्तिः सार्वभौमोऽपरसेवां चिकीर्षामीति चिन्तया वैचित्यसूचिका । वैयाघ्रपद्यः व्याघ्रपाद्गोत्रे भवः व्याघ्र इव पततीति व्याघ्रपाद्यमः तस्य कुले जातः वैयाघ्रपद्यः । गर्गादित्वाद्यञ् । यद्वा । वैयाघ्रं व्याघ्रचर्म तेन परिवृतो रथोऽपि वैयाघ्रः स एव पद्यं पादक्रमणीयं वाहनमस्येति वैयाघ्रपद्यः । 'परिवृतो रथ' इत्यधिकृत्य द्वैपवैयाघ्रादित्यञ् । विप्रः विशेषेण प्राति पूरयति ब्राह्मणादीन् धनादिभिरिति विप्रः । धर्मसूनुत्वाद्वा विप्रोऽहम् । ब्राह्मण इति पाठे तु ब्रह्मविदिति मुख्य एवार्थो ग्रहीतुं शक्यः। कङ्क इति कृतान्तनामेति प्रागेवोक्तम् । अक्षान् प्रयोक्तुं कुशलो बृहदश्वशिष्यत्वात् ॥ १२ ॥

विराट उवाच ।
ददामि ते हन्त वरं यमिच्छसि
प्रशाधि मत्स्यान् वशगो ह्यहं तव ।
प्रियाश्च धूर्ता मम देविनः सदा
भवांश्च देवोपम राज्यमर्हति ॥ १३
युधिष्ठिर उवाच ।
प्राप्तो विवादः प्रथमं विशाम्पते
न विद्यते कं च न मत्स्य हीनतः ।
न मे जितः कश्चन धारयेद्धनं
वरो ममैषोऽस्तु तव प्रसादजः ॥ १४
विराट उवाच ।
हन्यामवश्यं यदि तेऽप्रियं चरेत्
प्रव्राजयेयं विषयाद्द्विजांस्तथा ।
शृण्वन्तु मे जानपदाः समागताः
कङ्को यथाऽहं विषये प्रभुस्तथा ॥ १५
समानयानो भवितासि मे सखा
प्रभूतवस्त्रो बहुपानभोजनः ।
पश्येस्त्वमन्तश्च बहिश्च सर्वदा
कृतं च ते द्वारमपावृतं मया ॥ १६
ये त्वाऽनुवादेयुरवृत्तिकर्शिता
ब्रूयाश्च तेषां वचनेन मां सदा ।
दास्यामि सर्वं तदहं न संशयो
न ते भयं विद्यति सन्निधौ मम ॥ १७
वैशम्पायन उवाच ।
एवं स लब्ध्वा तु वरं समागमं
विराटराजेन नरर्षभस्तदा ।
उवास धीरः परमार्चितः सुखी
न चापि कश्चिच्चरितं बुबोध तत् ॥ १८

इति श्रीमहाभारते विराटपर्वणि पाण्डवप्रवेशपर्वणि युधिष्ठिरप्रवेशो नाम सप्तमोऽध्यायः ॥ ७ ॥

## ८

वैशम्पायन उवाच ।
अथापरो भीमबलः श्रिया ज्वल-
न्नुपाययौ सिंहविलासविक्रमः ।
खजां च दर्वीं च करेण धारय-
न्नसिं च कालाङ्गमकोशमव्रणम् ॥ १
स सूदरूपः परमेण वर्चसा
रविर्यथा लोकमिमं प्रकाशयन् ।
स कृष्णवासा गिरिराजसारवां-
स्तं मत्स्यराजं समुपेत्य तस्थिवान् ॥ २

देविनः देवनशीलाः ॥ १३ ॥ प्राप्तो विवाद इति । द्यूतिनां मध्ये इति शेषः । द्यूतकर्तां मध्ये हीनतः हीनात् पराजितात् यं कं च कमपि प्रथमं राजानं राजपुत्रं वा मुख्यं जयवन्तम् । प्रथमशब्दोऽत्र श्रेष्ठवाची तं प्रति विवादः प्राप्तो न विद्यते इति न । सत्यगन्धरहिते द्यूते पराजिता जयवद्भिः सह नित्यं कलहं कुर्वन्त्येवेत्यर्थः । हे विशाम्पते हे मत्स्येति आदरार्थे द्विः सम्बोधयति । यस्मादेवं तस्मात् कश्चन कोऽपि मया जितो मे मदीयं धनं न धारयेत् । अहं कलहाद्भीतस्त्वमेव सत्यं ज्ञात्वा मदीयं धनं दापयेत्यर्थः ॥ १४ ॥ ते तव अप्रियमिति छेदः । यथाऽहं विषये देशे प्रभुस्तथा कङ्कोऽपीति योजना ॥१५॥ अन्तर्धनदारादीन् बहिः सैन्यारामादीन् पश्येः पर्यालोचय । अपावृतमनावृतम् ॥ १६ ॥ अनुवादेऽयुः पूर्वं देहीत्युक्त्या दत्तस्यैव क्षेत्रारामादेः प्रतिवर्षं पुनर्देहीति राजवचनं यदधिकारिणं प्रति तदनुवादस्तन्निमित्तं ये त्वां प्रति अयुः प्राप्नुयुस्तेषां वचनेन सदाऽनवसरेऽपि मां ब्रूयाः । क्षणमपि ब्राह्मणवृत्तेः प्रतिबन्धो मा भूदित्याशयः ॥ १७ ॥ वरं श्रेष्ठं समागमं प्रीतिम् ॥ १८ ॥ इति श्रीमहाभारते विराटपर्वणि नैलकण्ठीये भारतभावदीपे सप्तमोऽध्यायः॥७॥

८

खजां मन्थनदण्डमङ्गारावक्षेपणं वा हस्ताकारं पिष्टविकारप्रमथनार्थं वा दण्डम् 'खजा मन्थप्रहस्तयोः' इति विश्वः। दर्वीं शाकादिपरिवेषणार्थामसिं मांसाद्यवकर्तनार्थं खड्गं कालाङ्गं कृष्णायसमयं तीक्ष्णमित्यर्थः । अकोशं पिधानहीनम् ॥ १ ॥ गिरिराजसारः महामेरुवत् कठिनदेहः । यद्वा गिरिराजसारो लोहं तेन तद्विकाररूपं पात्रजातं लक्ष्यते भक्ष्यद्रव्यपाकार्थं स्नेहपाकार्थं वा तद्वान् ॥ २ ॥

तं प्रेक्ष्य राजा रमयन्नुपागतं
ततोऽब्रवीज्जानपदान् समागतान् ।
सिंहोन्नतांसोऽयमतीव रूपवान्
प्रदृश्यते को नु वरर्षभो युवा ॥ ३
अदृष्टपूर्वः पुरुषो रविर्यथा
वितर्कयन्नास्य लभामि निश्चयम् ।
तथाऽस्य चित्तं ह्यपि संवितर्कय-
न्नरर्षभस्यास्य †न यामि तत्त्वतः ॥ ४
दृष्ट्वैव चैनं तु विचारयाम्यहं
गन्धर्वराजो यदि वा पुरन्दरः ।
जानीत कोऽयं मम दर्शने स्थितो
यदीप्सितं तल्लभतां च माचिरम् ॥ ५
विराटवाक्येन च तेन चोदिता
नरा विराटस्य सुशीघ्रगामिनः ।
उपेत्य कौन्तेयमथाब्रुवंस्तदा
यथा स राजाऽवदताच्युतानुजम् ॥ ६
ततो विराटं समुपेत्य पाण्डव-
स्त्वदीनरूपं वचनं महामनाः ।
उवाच सूदोऽस्मि नरेन्द्र बल्लवो
भजस्व मां व्यञ्जनकारमुत्तमम् ॥ ७
विराट उवाच ।
न सूदतां बल्लव श्रद्दधामि ते
सहस्रनेत्रप्रतिमो विराजसे ।
श्रिया च रूपेण च विक्रमेण च
प्रभाससे त्वं नृवरो नरेष्विव ॥ ८

भीम उवाच ।
नरेन्द्र सूदः परिचारकोऽस्मि ते
जानामि सूपान् प्रथमं च केवलान् ।
आस्वादिता ये नृपते पुराऽभवन्
युधिष्ठिरेणापि नृपेण सर्वशः ॥ ९
बलेन तुल्यश्च न विद्यते मया
नियुद्धशीलश्च सदैव पार्थिव ।
गजैश्च सिंहैश्च समेयिवानहं
सदा करिष्यामि तवानघ प्रियम् ॥ १०
विराट उवाच ।
ददामि ते हन्त वरान् महानसे
तथा च कुर्याः कुशल प्रभाषसे ।
न चैव मन्ये तव कर्म यत् समं
समुद्रनेमिं पृथिवीं त्वमर्हसि ॥ ११
यथा हि कामो भवतस्तथा कृतं
महानसे त्वं भव मे पुरस्कृतः ।
नराश्च ये तत्र समाहिताः पुरा
भवांश्च तेषामधिपो मया कृतः ॥ १२
वैशम्पायन उवाच ।
तथा स भीमो विहितो महानसे
विराटराज्ञो दयितोऽभवद्दृढम् ।
उवास राज्ये न च तं पृथग्जनो
बुबोध तत्रानुचराश्च केचन ॥ १३

इति श्रीमहाभारते विराटपर्वणि पाण्डवप्रवेशपर्वणि भीमप्रवेशे
अष्टमोऽध्यायः ॥ ८ ॥

## ९

वैशम्पायन उवाच ।
ततः केशान् समुत्क्षिप्य वेल्लिताग्रानिनन्दितान् ।
कृष्णान् सूक्ष्मान् मृदून्दीर्घान्समुद्ग्रथ्य शुचिस्मिता
जुगूहे दक्षिणे पार्श्वे मृदूनसितलोचना ।
वासश्च परिधायैकं कृष्णा सुमलिनं महत् ॥ २
कृत्वा वेषं च सैरन्ध्र्यास्ततो व्यचरदार्तवत् ।
तां नराः परिधावन्तीं स्त्रियश्च समुपाद्रवन् ॥ ३

तत्त्वतः तत्त्वं न यामि न प्राप्नोमि ॥ ४ ॥ अवदत् उक्तवान् । अच्युतो धर्मः फलमदत्त्वा न च्यवत इति योगात्स्यानुजम् ॥ ६ ॥ सूदः पाककर्ता बल्लवो नामतः ॥ ७ ॥ तव कर्म न चैव समं मन्ये । इतरकर्मणेति शेषः । अतिमानुषं कर्म वदसीत्यर्थः ॥ ११ ॥ इति विराटपर्वणि नैलकण्ठीये भारतभावदीपेऽष्टमोऽध्यायः ॥८॥
† ईदृगयमिति परिच्छेत्तुं न शक्नोमीत्यर्थः ।

९

तत इति । वेल्लिताग्रान् आकुञ्चिताग्रान् समुत्क्षिप्य वेणीकृत्य ॥ १ ॥ जुगूहे गोपितवती ॥ २ ॥

अपृच्छंश्चैव तां दृष्ट्वा का त्वं किं च चिकीर्षसि ।
सा तानुवाच राजेन्द्र सैरन्ध्र्यहमिहागता ॥ ४
कर्म चेच्छामि वै कर्तुं तस्य यो मां युयुक्षति ।
तस्या रूपेण वेषेण श्लक्ष्णया च तथा गिरा ।
न श्रद्दधत तां दासीमन्नहेतोरुपस्थिताम् ॥ ५
विराटस्य तु कैकेयी भार्या परमसम्मता ।
आलोकयन्ती ददृशे प्रासादाद्द्रुपदात्मजाम् ॥ ६
सा समीक्ष्य तथारूपामनाथामेकवाससम् ।
समाहूयाब्रवीद्भद्रे का त्वं किं च चिकीर्षसि॥ ७
सा तामुवाच राजेन्द्रसैरन्ध्र्यहमुपागता ।
कर्म चेच्छाम्यहं कर्तुं तस्य यो मां युयुक्षति॥ ८

सुदेष्णोवाच ।

नैवंरूपा भवन्त्येव यथा वदसि भामिनि ।
प्रेषयन्तीव वै दासीर्दासांश्च विविधान् बहून्॥९
नोच्चगुल्फा संहतोरुस्त्रिगम्भीरा षडुन्नता ।
रक्ता पञ्चसु रक्तेषु हंसगद्गदभाषिणी ॥ १०
सुकेशी सुस्तनी श्यामा पीनश्रोणिपयोधरा ।
तेन तेनैव सम्पन्ना काश्मीरीव तुरङ्गमी ॥ ११
अरालपक्ष्मनयना बिम्बोष्ठी तनुमध्यमा ।
कम्बुग्रीवा गूढशिरा पूर्णचन्द्रनिभानना ॥ १२
शारदोत्पलपत्राक्ष्या शारदोत्पलगन्धया ।
शारदोत्पलसेविन्या रूपेण सदृशी श्रिया ॥ १३
का त्वं ब्रूहि यथा भद्रे नासि दासी कथञ्चन ।
यक्षी वा यदि वा देवी गन्धर्वी यदि वाऽप्सराः
देवकन्या भुजङ्गी वा नगरस्याथ देवता ।
विद्याधरी किन्नरी वा यदि वा रोहिणी स्वयम्
अलम्बुषा मिश्रकेशी पुण्डरीकाऽथ मालिनी ।
इन्द्राणी वारुणी वा त्वं त्वष्टुर्धातुः प्रजापतेः ।
देव्यो देवेषु विख्यातास्तासां त्वं कतमा शुभे१६

द्रौपद्युवाच ।

नास्मि देवी न गन्धर्वी नासुरी न च राक्षसी ।
सैरन्ध्री तु भुजिष्याऽस्मि सत्यमेतद्ब्रवीमि ते १७
केशान् जानाम्यहं कर्तुं पिंषे साधु विलेपनम् ।
मल्लिकोत्पलपद्मानां चम्पकानां तथा शुभे ॥ १८
ग्रथयिष्ये विचित्राश्च स्रजः परमशोभनाः ।
आराधयं सत्यभामां कृष्णस्य महिषीं प्रियाम्१९
कृष्णां च भार्यां पाण्डूनां कुरूणामेकसुन्दरीम् ।
तत्र तत्र चराम्येवं लभमाना सुभोजनम् ॥ २०
वासांसि यावन्ति लभे तावत्तावद्रमे तथा ।
मालिनीत्येव मे नाम स्वयं देवी चकार सा ।
साऽहमद्यागता देवि सुदेष्णे त्वन्निवेशनम् ॥ २१

सुदेष्णोवाच ।

मूर्ध्नि त्वां वासयेयं वै संशयो मे न विद्यते ।
न चेदिच्छति राजा त्वां गच्छेत् सर्वेण चेतसा
स्त्रियो राजकुले याश्च याश्चेमा मम वेश्मनि ।
प्रसक्तास्त्वां निरीक्षन्ते पुमांसं कं न मोहयेः॥२३
वृक्षांश्चावस्थितान् पश्य य इमे मम वेश्मनि ।
तेऽपि त्वां सन्नमन्तीव पुमांसं कं न मोहयेः॥२४
राजा विराटः सुश्रोणि दृष्ट्वा वपुरमानुषम् ।
विहाय मां वरारोहे गच्छेत् सर्वेण चेतसा॥ २५
यं हि त्वमनवद्याङ्गि तरलायतलोचने ।
प्रसक्तमभिवीक्षेथाः स कामवशगो भवेत् ॥ २६
यश्च त्वां सततं पश्येत् पुरुषश्चारुहासिनि ।
एवं सर्वानवद्याङ्गि स चानङ्गवशो भवेत् ॥ २७
अध्यारोहेद्यथा वृक्षान् वधायैवात्मनो नरः ।
राजवेश्मनि ते सुभ्रु गृहे तु स्यात् तथा मम॥ २८

---

युयुक्षति योजयितुमिच्छति । पुपूषतीति पाठे पोषयितुमिच्छति ॥ ५ ॥ नैवंरूपा त्वमसि किं तु दासान् दासीश्च प्रेषयन्तीव बहूनां स्वामिन्यसीत्यर्थः ॥ ९ ॥ नोच्चौ न बहिर्निर्गतौ गूढावित्यर्थः । नोच्चौ गुल्फौ पादग्रन्थी यस्याः सा तथा । त्रिगम्भीरा त्रिषु शब्द-बुद्धिनाभीषु गहना । षडुन्नता षट्सु नासिकाक्षिद्वयश्रोत्रनख-स्तनकृकाटिकासु उत्ताना । पञ्चसु स्थानेषु पादपाणितलने-त्रान्तोष्ठजिह्वानखेषु एतान्येव संज्ञाया पञ्चरक्तानि तेषु रक्ता । हंसवत् गद्गदं किंचित् लुप्ताक्षरं मधुरं वा भाषते सा हंसगद्गदभाषिणी ॥ १० ॥ तेन तेन लक्षणेन मन्दगतित्वादिना ॥ ११ ॥ अराले वक्रे कृष्णे वा पक्ष्मणी ययोस्तादृशे नयने यस्याः सा । तथा कम्बुग्रीवा शङ्खवत् रेखात्रयाङ्कितग्रीवा । गूढशिरा गुप्तनाडिका ॥ १२ ॥ सैरन्ध्रीभुजिष्यापदे प्राक् व्यर्थे व्याख्याते ॥ १७ ॥ कर्तुं संस्कर्तुम् ॥ १८ ॥ कृष्णां च भार्यां पाण्डूनामिति स्वात्मना स्वस्याराधनम् सम्भवतीति नेयं मृषोक्तिः ॥ २० ॥ राजा त्वां चेन्न इच्छति तदा त्वां मूर्ध्नि वासये परन्तु राजा त्वां सर्वेण चेतसा गच्छेत्स्पृहयेदेवेति शङ्के ॥ २२ ॥ त्वं स्त्रीणामपि मोहकरी किमुत पुंसामित्याह—स्त्रिय इति ॥ २३ ॥ वृक्षानिति । वृक्षा अपि त्वां दृष्ट्वा स्तब्धाः सन्तीत्यर्थः ॥ २४ ॥ प्रसक्तमासक्तियुक्तं यथा स्यात्तथा ॥२६॥ एवमनेनैव श्लोकेनवृक्षादिस्तब्धीभावाविष्कृतेन ॥ २७ ॥ + शारदोत्पलं हस्तद्वयम् ।

यथा च §कर्कटी गर्भमाधत्ते मृत्युमात्मनः ।
तथाविधमहं मन्ये वासं तव शुचिस्मिते ॥ २९

द्रौपद्युवाच ।

नास्मि लभ्या विराटेन न चान्येन कदाचन ।
गन्धर्वाः पतयो मह्यं युवानः पञ्च भामिनि ॥ ३०
पुत्रा गन्धर्वराजस्य महासत्त्वस्य कस्यचित् ।
रक्षन्ति ते च मां नित्यं दुःखाचारा तथा ह्यहम् ॥
यो मे न दद्यादुच्छिष्टं न च पादौ प्रधावयेत् ।
प्रीणेरंस्तेन वासेन गन्धर्वाः पतयो मम ॥ ३२
यो हि मां पुरुषो ‡गृध्येद्यथाऽन्याः प्राकृताः स्त्रियः
तामेव निवसेद्रात्रिं प्रविश्य च परां तनुम् ॥ ३३
न चाप्यहं चालयितुं शक्या केनचिदङ्गने ।
दुःखशीला हि गन्धर्वास्ते च मे बलवत्प्रियाः ३४
प्रच्छन्नाश्चापि रक्षन्ति ते मां नित्यं शुचिस्मिते।

सुदेष्णोवाच ।

एवं त्वां वासयिष्यामि यथा त्वं नन्दिनीच्छसि
न च पादौ न चोच्छिष्टं स्प्रक्ष्यसि त्वं कथञ्चन ।

वैशम्पायन उवाच ।

एवं कृष्णा विराटस्य भार्यया परिसान्त्विता ३६
उवास नगरे तस्मिन् पतिधर्मवती सती ।
न चैनां वेद तत्रान्यस्तत्त्वेन जनमेजय ॥ ३७

इति श्रीमहाभारते विराटपर्वणि पाण्डवप्रवेशपर्वणि द्रौपदीप्रवेशे नवमोऽध्यायः ॥ ९ ॥

## १०

वैशम्पायन उवाच ।

सहदेवोऽपि गोपानां कृत्वा वेषमनुत्तमम् ।
भाषां चैषां समास्थाय विराटमुपयादथ ॥ १
गोष्ठमासाद्य तिष्ठन्तं भवनस्य समीपतः ।
राजाऽथ दृष्ट्वा पुरुषान् प्राहिणोज्जातविस्मयः ॥ २
तमायान्तमभिप्रेक्ष्य भ्राजमानं नरर्षभम् ।
समुपस्थाय वै राजा पप्रच्छ कुरुनन्दनम् ॥ ३
कस्य वा त्वं कुतो वा त्वं किं वा त्वं तु चिकीर्षसि
न हि मे दृष्टपूर्वस्त्वं तत्त्वं ब्रूहि नरर्षभ ॥ ४
संप्राप्य राजानममित्रतापनं
ततोऽब्रवीन्मेघमहौघनिःस्वनः
वैश्योऽस्मि नाम्नाऽहमरिष्टनेमि-
र्गोसङ्ख्य आसं कुरुपुङ्गवानाम् ॥ ५
वस्तुं त्वयीच्छामि विशां वरिष्ठ
तान् राजसिंहान् न हि वेद्मि पार्थान् ।
न शक्यते जीवितुमन्यकर्मणा
न च त्वदन्यो मम रोचते नृपः ॥ ६

विराट उवाच ।

त्वं ब्राह्मणो यदि वा क्षत्रियोऽसि
समुद्रनेमीश्वररूपवानसि ।
आचक्ष्व मे तत्त्वममित्रकर्शन
न वैश्यकर्म त्वयि विद्यते क्षमम् ॥ ७

---

कर्कटी षट्पादवान् जन्तुः ॥ २९ ॥ मह्यं मम गन्धर्वा इति देवतांशजत्वादमानुषत्वमात्रं विवक्षितम्। अतिमानुषकर्माण इत्यर्थः ॥ ३० ॥ गन्धर्वतुल्यो राजा गन्धर्वराजः पाण्डुस्तस्येति गूढोऽभिसन्धिः। दुःखा दुःखवती अतिदुःखदा चाहं परपत्नीत्वात्। आरा सिंहीव सिंही परैरनाक्रमणीया । 'आरः पुंसि तरोर्भेदे तथा कर्कटदंष्ट्रिणोः' इति मेदिनी। आरशब्दाददन्तत्वात् स्त्रियां टाप्। स्वयमेव तीक्ष्णव्रताऽस्मीति भावः। दुःखाचारेति। क्लेशकालोऽयं कियान् ममास्तीति दर्शयति ॥ ३१ ॥ परां तनुं प्रविश्येत्यनेन परलोकं गच्छेदेवेत्युक्तम् ॥ ३३ ॥ तेऽपि दुःखशीलाः केनचिन्निमित्तेन दुःखं सहन्तीत्यर्थः । बलवन्तश्च ते प्रियाश्च ॥ ३४ ॥ हे नन्दिनि सुखदे ॥ ३५ ॥ इति श्रीमहाभारते विराटपर्वणि नैलकण्ठीये भारतभावदीपे नवमोऽध्यायः ॥ ९ ॥ § 'खेंकडा' इति प्रसिद्धिः ।
‡ गृध्येत्--प्रार्थयेत् ।

१०

सहदेवेति। उपयात् उपायात् ॥ १ ॥ वेशो रूपान्तरप्रकाशनं कर्म यस्य स वैश्यः। अरिष्टनेमिः अप्रतिहतचक्रोऽस्मीति गूढोऽभिसन्धिः। कुरुपुङ्गवानां पाण्डवानां मध्ये गोसङ्ख्यः। गो इति इन्द्रियवाचित्वात् पञ्चानां संख्या यस्य स गोसंख्यः पञ्चसंख्यः पञ्चम इत्यर्थः ॥ ५ ॥ तान् राजसिंहान् वर्तमानकाले राजमूर्धस्थान् न वेद्मि नोपलभे स्वर्गा ध्वस्त इतिवद्विशेषणादर्शनाद्विशिष्टादर्शनमुक्तमित्यदोषः ॥ ६ ॥

कस्यासि राज्ञो विषयादिहागतः
किं वाऽपि शिल्पं तव विद्यते कृतम् ।
कथं त्वमस्मासु निवत्स्यसे सदा
वदस्व किं चापि तवेह वेतनम् ॥ ८

सहदेव उवाच ।

पञ्चानां पाण्डुपुत्राणां ज्येष्ठो भ्राता युधिष्ठिरः ।
तस्याष्टशतसाहस्रा गवां +वर्गाः शतं शतम् ॥९
अपरे शतसाहस्रा द्विस्तावन्तस्तथा परे ।
तेषां गोसङ्ख्य आसं वै तन्तिपालेति मां विदुः॥
भूतं भव्यं भविष्यं च यच्च सङ्ख्यागतं गवाम् ।
न मेऽस्त्यविदितं किञ्चित् समन्ताद्दशयोजनम्
गुणाः सुविदिता ह्यासन् मम तस्य महात्मनः ।
असीच्च स मया दृष्टः कुरुराजो युधिष्ठिरः ॥ १२
क्षिप्रं च गावो बहुला भवन्ति
न तासु रोगो भवतीह कश्चन ।

तैस्तैरुपायैर्विदितं ममैत-
देतानि शिल्पानि मयि स्थितानि ॥ १३
ऋषभांश्चापि जानामि राजन् पूजितलक्षणान् ।
येषां मूत्रमुपाघ्राय अपि वन्ध्या प्रसूयते ॥ १४

विराट उवाच ।

शतं सहस्राणि समाहितानि
सवर्णवर्णस्य विमिश्रितान् गुणैः ।
पशून् सपालान् भवते ददाम्यहम्
त्वदाश्रया मे पशवो भवन्तिवह ॥ १५

वैशम्पायन उवाच ।

तथा स राज्ञो विदितो विशाम्पते-
रुवास तत्रैव सुखं नरोत्तमः ।
न चैनमन्येऽपि विदुः कथञ्चन
प्रादाच्च तस्मै भरणं यथेप्सितम् ॥ १६

इति श्रीमहाभारते विराटपर्वणि पाण्डवप्रवेशपर्वणि सहदेवप्रवेशे
दशमोऽध्यायः ॥ १० ॥

## ११

वैशम्पायन उवाच ।

अथापरोऽदृश्यत रूपसम्पदा
स्त्रीणामलङ्कारधरो बृहत्पुमान् ।
प्राकारवप्रे प्रतिमुच्य कुण्डले
दीर्घे च कम्बूपरि हाटके शुभे ॥ १
बाहू च दीर्घान् प्रविकीर्य मूर्धजान्
महाभुजो वारणतुल्यविक्रमः ।
गतेन भूमिं प्रतिकम्पयंस्तदा
विराटमासाद्य सभासमीपतः ॥ २
तं प्रेक्ष्य राजोपगतं सभातले
व्याजात् प्रतिच्छन्नमरिप्रमाथिनम् ।

विराजमानं परमेण वर्चसा
सुतं महेन्द्रस्य गजेन्द्रविक्रमम् ॥ ३
सर्वानपृच्छच्च सभानुचारिणः
कुतोऽयमायाति पुरा न मे श्रुतः ।
न चैनमूचुर्विदितं तदा नराः
सविस्मयं वाक्यमिदं नृपोऽब्रवीत् ॥ ४
सत्त्वोपपन्नः पुरुषोऽमरोपमः
श्यामो युवा वारणयूथपोपमः ।
आमुच्य कम्बूपरि हाटके शुभे
विमुच्य वेणीमपिनह्य कुण्डले ॥ ५

---

गोसंख्यो गवां परीक्षकः । तन्तिपालो वचनकरः ॥ १० ॥ संख्यागतं परीक्षायामवगतम् ॥११॥ समानो वर्णो येषां ते सवर्णाः वर्णस्य वर्णेन विमिश्रिताश्च पाटलादयः । विभक्त्यलोप आर्षः । सवर्णाश्च वर्णविमिश्रिताश्च तान् । तत्तद्गुणैः उपलक्षितान् ॥ १५ ॥ राज्ञो राज्यकर्तुः विशाम्पतेः प्रजापालकस्य भरणं वेतनम् ॥ १६ ॥ इति श्रीम० विराटपर्वणि नैलकण्ठीये भारतभावदीपे दशमोऽध्यायः ॥ १० ॥

११

अथेति । अदृश्यत दृष्टः रूपसम्पदा उपलक्षितः प्राकारवप्रे स्थितैः तत्समीपे वा स्थितोऽदृश्यत दृष्टः। प्रतिमुच्य परिधाय दीर्घे कुण्डले ताटङ्के कम्बूनां शङ्खानामुपरि कम्बूपरि हाटके कनकमये वलये च परिमुच्य ॥१॥ दीर्घान् मूर्धजान् बाहू च प्रविकीर्य व प्रसार्य ॥२॥ + वर्गाः सजातीयसमुदायाः ।

स्रग्वी सुकेशः परिधाय चान्यथा
शुशोभ धन्वी कवची शरी यथा ।
आरुह्य यानं परिधावतां भवान्
सुतैः समो मे भव वा मया समः ॥ ६
वृद्धो ह्यहं वै परिहारकामः
सर्वान् मत्स्यांस्तरसा पालयस्व ।
नैवंविधाः क्लीबरूपा भवन्ति
कथञ्चनेति प्रतिभाति मे मनः ॥ ७
अर्जुन उवाच ।
गायामि नृत्याम्यथ वादयामि
भद्रोऽस्मि नृत्ये कुशलोऽस्मि गीते ।
त्वमुत्तरायै प्रदिशस्व मां स्वयं
भवामि देव्या नरदेव नर्तकः ॥ ८
इदं तु रूपं मम येन किं तव
प्रकीर्तयित्वा भृशशोकवर्धनम् ।
बृहन्नलां मां नरदेव विद्धि
सुतं सुतां वा पितृमातृवर्जिताम् ॥ ९
विराट उवाच ।
ददामि ते हन्त वरं बृहन्नले
सुतां च मे नर्तय याश्च तादृशीः ।
इदं तु ते कर्म समं न मे मतं
समुद्रनेमिं पृथिवीं त्वमर्हसि ॥ १०
वैशम्पायन उवाच ।
बृहन्नलां तामभिवीक्ष्य मत्स्यराट्
कलासु नृत्येषु तथैव वादिते
संमन्त्र्य राजा विविधैः स्वमन्त्रिभिः
परीक्ष्य चैनं प्रमदाभिराशु वै ॥ ११
अपुंस्त्वमप्यस्य निशम्य च स्थिरं
ततः कुमारीपुरमुत्ससर्ज तम् ।
स शिक्षयामास च गीतवादितं
सुतां विराटस्य धनञ्जयः प्रभुः ॥ १२
सखीश्च तस्याः परिचारिकास्तथा
प्रियश्च तासां स बभूव पाण्डवः ॥ १३
तथा स सत्रेण धनञ्जयो वसन्
प्रियाणि कुर्वन् सह ताभिरात्मवान् ।
तथा च तं तत्र न जज्ञिरे जना
बहिश्चरा वाऽप्यथ चान्तरेचराः ॥ १४

इति श्रीमहाभारते विराटपर्वणि पाण्डवप्रवेशपर्वणि अर्जुनप्रवेशो नाम
एकादशोऽध्यायः ॥ ११ ॥

## १२

वैशम्पायन उवाच ।
अथापरोऽदृश्यत पाण्डवः प्रभु-
र्विराटराजं तरसा समेयिवान् ।
तमापतन्तं ददृशे ‡पृथग्जनो
विमुक्तमभ्रादिव सूर्यमण्डलम् ॥ १
स वै हयानैक्षत तांस्ततस्ततः
समीक्षमाणं स ददर्श मत्स्यराट् ।
ततोऽब्रवीत्ताननुगान्नरेश्वरः
कुतोऽयमायाति नरोऽमरोपमः ॥ २
स्वयं हयानीक्षति मामकान् दृढं
ध्रुवं हयज्ञो भविता विचक्षणः ।
प्रवेश्यतामेष समीपमाशु मे
विभाति वीरो हि यथाऽमरस्तथा ॥ ३
अभ्येत्य राजानमामित्रहाऽब्रवी-
ज्जयोऽस्तु ते पार्थिव भद्रमस्तु वः ।
हयेषु युक्तो नृप संमतः सदा
तवाश्वसूतो निपुणो भवाम्यहम् ॥ ४
विराट उवाच ।
ददामि यानानि धनं निवेशनं
ममाश्वसूतो भवितुं त्वमर्हसि ।
कुतोऽसि कस्यासि कथं त्वमागतः
प्रब्रूहि शिल्पं तव विद्यते च यत् ॥ ५

---

परिहारकामः अमात्येषु राज्यभारं न्यस्तुकामः ॥ ७ ॥ देव्या उत्तरायाः ॥ ८ ॥ येन हेतुना इदं रूपं मम जातं तत्कीर्तनं तव निकटे व्यर्थं शोककरं चेत्यर्थः॥ ९ ॥ ते समं त्वदाकृत्या युक्तं न इति मे मम मतम्॥१०॥अपुंस्त्वं क्लीबत्वं। निशम्य आलोच्य ॥ १२ ॥ सत्रेण कैतवेन । 'सत्रमाच्छादने यज्ञे सदादाने च कैतवे 'इति विश्वः। न जज्ञिरे न ज्ञातवन्तः ॥१४॥ इति श्रीम० विराटप० नैल० भारतभावदीपे एकादशोऽध्यायः ॥११॥ ‡ पृथग्जनः प्राकृतजनः इत्यर्थः ।

नकुल उवाच ।

पञ्चानां पाण्डुपुत्राणां ज्येष्ठो भ्राता युधिष्ठिरः ।
तेनाहमश्वेषु पुरा नियुक्तः शत्रुकर्शन ॥ ६
अश्वानां प्रकृतिं वेद्मि विनयं चापि सर्वशः ।
दुष्टानां प्रतिपत्तिं च कृत्स्नं चैव चिकित्सितम् ७
न कातरं स्यान्मम जातु वाहनं
न मेऽस्ति दुष्टा वडवा कुतो हयाः ।
जनस्तु मामाह स चापि पाण्डवो
युधिष्ठिरो ग्रन्थिकमेव नामतः ॥ ८

विराट उवाच

यदस्ति किञ्चिन्मम वाजिवाहनं
तदस्तु सर्वं त्वदधीनमद्य वै ।
ये चापि केचिन्मम वाजियोजका-
स्त्वदाश्रयाः सारथयश्च सन्तु मे ॥ ९
इदं तवेष्टं यदि वै सुरोपम
ब्रवीहि यत्ते प्रसमीक्षितं वसु ।
न तेऽनुरूपं हयकर्म विद्यते
प्रभासि राजेव हि संमतो मम ॥ १०
युधिष्ठिरस्येव हि दर्शनेन मे
समं तवेदं प्रियमत्र दर्शनम् ।
कथं तु भृत्यैः स विनाकृतो वने
वसत्यनिन्द्यो रमते च पाण्डवः ॥ ११

वैशम्पायन उवाच ।

तथा स गन्धर्ववरोपमो युवा
विराटराज्ञा मुदितेन पूजितः ।
न चैनमन्येऽपि विदुः कथञ्चन
प्रियाभिरामं विचरन्तमन्तरा ॥ १२
एवं हि मत्स्ये न्यवसन्त पाण्डवा
यथाप्रतिज्ञाभिरमोघदर्शनाः ।
अज्ञातचर्यां व्यचरन् समाहिताः
समुद्रनेमीपतयोऽतिदुःखिताः ॥ १३

इति श्रीमहाभारते विराटपर्वणि पाण्डवप्रवेशपर्वणि नकुलप्रवेशे
द्वादशोऽध्यायः ॥ १२ ॥

॥ समाप्तं पाण्डवप्रवेशपर्व ॥

## समयपालनपर्व २

## १३

जनमेजय उवाच ।

एवं ते मत्स्यनगरे प्रच्छन्नाः कुरुनन्दनाः ।
अत ऊर्ध्वं महावीर्याः किमकुर्वत वै द्विज ॥ १

वैशम्पायन उवाच ।

एवं मत्स्यस्य नगरे प्रच्छन्नाः कुरुनन्दनाः ।
आराधयन्तो राजानं यदकुर्वत तच्छृणु ॥ २
तृणबिन्दुप्रसादाच्च धर्मस्य च महात्मनः ।
अज्ञातवासमेवं तु विराटनगरेऽवसन् ॥ ३
युधिष्ठिरः सभास्तारो मत्स्यानामभवत् प्रियः ।
तथैव च विराटस्य सपुत्रस्य विशाम्पते ॥ ४
×स ह्यक्षहृदयज्ञस्तान् क्रीडयामास पाण्डवः ।
अक्षवत्यां यथाकामं सूत्रबद्धानिव द्विजान्× ॥ ५
अज्ञातं च विराटस्य विजित्य वसु धर्मराट् ।
भ्रातृभ्यः पुरुषव्याघ्रो यथार्हं संप्रयच्छति ॥ ६
भीमसेनोऽपि मांसानि भक्ष्याणि विविधानि च
अतिसृष्टानि मत्स्येन विक्रीणीते युधिष्ठिरे ॥ ७
वासांसि परिजीर्णानि लब्धान्यन्तःपुरेऽर्जुनः ।
विक्रीणानश्च सर्वेभ्यः पाण्डवेभ्यः प्रयच्छति ॥ ८
सहदेवोऽपि गोपानां वेषमास्थाय पाण्डवः ।
दधि क्षीरं घृतं चैव पाण्डवेभ्यः प्रयच्छति ॥ ९

---

१२

अथेति । प्रकृतिं जातिम् । विनयं शिक्षाम् । प्रतिपत्तिं दोषनिराकरणप्रकारम् । चिकित्सितं व्याध्युपशमोपायम् ॥ ७ ॥ कातरं भीरु । वडवा अश्वा । अत एव ग्रन्थिकमश्वशास्त्रज्ञम् ॥ ८ ॥ इति श्रीमहाभारते विराटपर्वणि नैलकण्ठीये भारतभावदीपे नकुलप्रवेशो नाम द्वादशोऽध्यायः ॥ १२ ॥

× स पाण्डवस्तान् द्विजान् पक्षिण इवाक्षवत्यां द्यूतशालायां द्यूतैराक्रीडयामासेति संबन्धः ।

नकुलोऽपि धनं लब्ध्वा कृते कर्मणि वाजिनाम् ।
तुष्टे तस्मिन्नरपतौ पाण्डवेभ्यः प्रयच्छति ॥ १०
कृष्णा तु सर्वान् भर्तृंस्तान्निरीक्षन्ती तपस्विनी ।
यथा पुनरविज्ञाता तथा चरति भामिनी ॥ ११
एवं सम्पादयन्तस्ते तदाऽन्योन्यं महारथाः ।
विराटनगरे चेरुः पुनर्गर्भधृता इव ॥ १२
साशङ्का धार्तराष्ट्रस्य भयात् पाण्डुसुतास्तदा ।
प्रेक्षमाणास्तदा कृष्णामूषुश्छन्ना नराधिप ॥ १३
अथ मासे चतुर्थे तु ब्रह्मणः सुमहोत्सवः ।
आसीत् समृद्धो मत्स्येषु पुरुषाणां सुसंमतः १४
तत्र मल्लाः समापेतुर्दिग्भ्यो राजन् सहस्रशः ।
समाजे ब्रह्मणो राजन् यथा पशुपतेरिव ॥ १५
महाकाया महावीर्याः कालखञ्जा इवासुराः ।
वीर्योन्मत्ता बलोदग्रा राज्ञा समभिपूजिताः॥१६
सिंहस्कन्धकटिग्रीवाः स्ववदाता मनस्विनः ।
असकृल्लब्धलक्षास्ते रङ्गे पार्थिवसन्निधौ ॥ १७
तेषामेको महानासीत् सर्वमल्लानथाह्वयत् ।
आवल्गमानं तं रङ्गे नोपतिष्ठति कश्चन ॥ १८
यदा सर्वे विमनसस्ते मल्ला हतचेतसः ।
अथ सूदेन तं मल्लं योधयामास मत्स्यराट् ॥ १९
नोद्यमानस्तदा भीमो दुःखेनैवाकरोन्मतिम् ।
न हि शक्नोति विवृते प्रत्याख्यातुं नराधिपम् ॥२०
ततः स पुरुषव्याघ्रः शार्दूलशिथिलश्चरन् ।
प्रविवेश महारङ्गं विराटमभिपूजयन् ॥ २१

बबन्ध कक्षां कौन्तेयस्ततः संहर्षयन् जनम् ।
ततस्तु वृत्रसङ्काशं भीमो मल्लं समाह्वयत् ॥ २२
जीमूतं नाम तं तत्र मल्लं प्रख्यातविक्रमम् ।
तावुभौ सुमहोत्साहावुभौ भीमपराक्रमौ ॥ २३
मत्ताविव महाकायौ वारणौ षष्टिहायनौ ।
ततस्तौ नरशार्दूलौ बाहुयुद्धं समीयतुः ॥ २४
वीरौ परमसंहृष्टावन्योन्यजयकाङ्क्षिणौ ।
आसीत् सुभीमः संपातो वज्रपर्वतयोरिव ॥ २५
उभौ परमसंहृष्टौ बलेनातिबलावुभौ ।
अन्योन्यस्यान्तरं प्रेप्सू परस्परजयैषिणौ ॥ २६
उभौ परमसंहृष्टौ मत्ताविव महागजौ ।
कृतप्रतिकृतैश्चित्रैर्बाहुभिश्च सुसङ्कटैः ।
सन्निपातावधूतैश्च प्रमाथोन्मथनैस्तथा ॥ २७
क्षेपणैर्मुष्टिभिश्चैव वराहोद्धूतनिःस्वनैः ।
तलैर्वज्रनिपातैश्च प्रसृष्टाभिस्तथैव च ॥ २८
शलाकानखपातैश्च पादोद्धूतैश्च दारुणैः ।
जानुभिश्चाश्मनिर्घोषैः शिरोभिश्चावघट्टनैः ॥२९
तद्युद्धमभवद्घोरमशस्त्रं बाहुतेजसा ।
बलप्राणेन शूराणां समाजोत्सवसन्निधौ ॥ ३०
अरज्यत जनः सर्वः सोत्कुष्टनिनदोत्थितः ।
बलिनोः संयुगे राजन् वृत्रवासवयोरिव ॥ ३१
प्रकर्षणाकर्षणयोरभ्याकर्षविकर्षणैः ।
आकर्षतुरथान्योन्यं जानुभिश्चापि जघ्नतुः ॥ ३२

---

१३

**एवमिति** । सम्पादयन्तोऽन्योन्यमाराधयन्तः गर्भधृता इव प्रच्छन्नत्वेन सेवाश्रमेण च दुःखिता इत्यर्थः॥१२॥ब्रह्मणः उत्सवः शरदि नवधान्योत्पत्तौ सर्वैः क्रियते स च देशविशेषे प्रसिद्धः ॥ १४ ॥ यथा ब्रह्मणः समाजे ब्रह्मलोके कैलासे वा पशुपतेः समाजे इव मत्स्येषु समापेतुरिति सम्बन्धः ॥१५॥ स्ववदाताः अत्यन्तनिर्मलाः मनस्विनः प्रीतमनसः लब्धलक्षाः प्राप्तविजयाः ॥ १७ ॥ सूदेन भीमेन ॥ १९॥ दुःखेनैव पारतन्त्र्यात् प्राकट्यभयाद्वा दुःखं न तु भङ्गभयात्। विवृते प्रकाशे॥२०॥ कक्षां परिकरम् । कच्छामिति पाठेऽपि स एवार्थः। यद्वा कक्षां रज्जुं रज्ज्वा पाटनभयान्मल्लैरङ्गुल्यो बध्यन्त इति प्रसिद्धेरङ्गुलीर्बध्वेत्यर्थः ॥ २२ ॥ कृतं कचिद्देशे निपीडनम्। प्रतिकृतं तस्य मोचनम्। सुसंकटैर्मुष्टिग्रहणेन कृशीकृतैः। संकण्टकैरिति पाठे सकवचैः सकिणैर्वा 'कण्टको बाहुचरणकवचे कठिने किणे'इति विश्वः। सन्निपातोऽङ्गसङ्घट्टनं अवधूतं तेनैव दूरीकरणं। प्रमाथादय उक्ता मल्लशास्त्रे-'निपात्य पेषणं भूमौ प्रमाथ इति कथ्यते। यत्तूत्थायाङ्गमथनं तदुन्मथनमुच्यते' ॥ २७ ॥-'क्षेपणं कथ्यते यत्तु स्थानात्प्रच्यावनं हठात्। उभयोर्भुजयोर्मुष्टिरुरोमध्ये निपात्यते। मुष्टिरित्युच्यते तज्ज्ञैर्मल्लविद्याविशारदैः । अवाङ्मुखं स्कन्धगतं भ्रामयित्वा तथैव यः। क्षिप्तस्य शब्दः स भवेद्वराहोद्धूतनिःस्वनः ।' तलैर्वज्रनिपातैर्वज्रवद्दृढपातैश्चपेटैः ।-'अङ्गुल्यः प्रसृता यास्तु ताः प्रसृष्टा उदीरिताः' ॥ २८ ॥ 'ऋज्वी दृढा रुषा क्षिप्ता शलाका साङ्गुली स्मृता।' तस्या नखपातैः। पादोद्धूतैः पादप्रसारणेनाक्षेपैः। जानुभिः शिरोभिश्च कृतैरवघट्टनैरास्फालनैः। अश्मनिर्घोषैरित्युभयविशेषणम् ॥ २९ ॥ अशस्त्रं निन्द्यम् यथोक्तं तत्रैव-'बाहुयुद्धं हि मल्लानामशस्त्रमृषिभिः स्मृतम् । मृतस्य तस्य न स्वर्गो यशो नेहापि विद्यते ' इति । बलप्राणेन बलेन शारीरबलेन प्राणेन मानसबलेन च॥३०॥ सोत्कुष्टनिनदः हीहीशब्दोच्चारणेन यज्जितस्य समुत्थापनं तत्सहितः॥३१॥-'आकृष्य क्रोडीकरणं प्रकर्षणमुदाहृतम्। आकर्षणं लीलयैत्र संमुखीकरणं स्मृतम्। पुरः पश्चात् पार्श्वयोश्चा-

ततः शब्देन महता भर्त्सयन्तौ परस्परम् ।
व्यूढोरस्कौ दीर्घभुजौ नियुद्धकुशलावुभौ ।
बाहुभिः समसज्जेतामायसैः परिघैरिव ॥ ३३
चकर्ष दोर्भ्यामुत्पात्य भीमो मल्लममित्रहा ।
विनिनदन्तमभिक्रोशन् शार्दूल इव वारणम् ॥ ३४
समुद्यम्य महाबाहुर्भ्रामयामास वीर्यवान् ।
ततो मल्लाश्च मत्स्याश्च विस्मयं चक्रिरे परम् ३५
भ्रामयित्वा *शतगुणं गतसत्त्वमचेतनम् ।
¶प्रत्यपिंषन्महाबाहुर्मल्लं भुवि वृकोदरः ॥ ३६
तस्मिन् विनिहते वीरे जीमूते लोकविश्रुते ।
विराटः परमं हर्षमगच्छद्बान्धवैः सह ॥ ३७
प्रहर्षात् प्रददौ वित्तं बहु राजा महामनाः ।
बल्लवाय महारङ्गे यथा वैश्रवणस्तथा ॥ ३८
एवं स सुबहून् मल्लान् पुरुषांश्च महाबलान् ।
विनिघ्नन् मत्स्यराजस्य प्रीतिमाहरदुत्तमाम् ३९
यदास्य तुल्यः पुरुषो न कश्चित्तत्र विद्यते ।
ततो व्याघ्रैश्च सिंहैश्च द्विरदैश्चाप्ययोधयत् ॥ ४०
पुनरन्तःपुरगतः स्त्रीणां मध्ये वृकोदरः ।
योध्यते स विराटेन सिंहैर्मत्तैर्महाबलैः ॥ ४१
बीभत्सुरपि गीतेन स्वनृत्येन च पाण्डवः ।
विराटं तोषयामास सर्वाश्चान्तःपुरस्त्रियः ॥ ४२
अश्वैर्विनीतैर्जवनैस्तत्र तत्र समागतैः ।
तोषयामास राजानं नकुलो नृपसत्तमम् ॥ ४३
तस्मै प्रदेयं प्रायच्छत् प्रीतो राजा धनं बहु ।
विनीतान् वृषभान् दृष्ट्वा सहदेवस्य चाभितः ।
धनं ददौ बहुविधं विराटः पुरुषर्षभः ॥ ४४
द्रौपदी प्रेक्ष्य तान्सर्वान् क्लिश्यमानान्महारथान् ।
नातिप्रीतमना राजन्निःश्वासपरमाऽभवत् ॥ ४५
एवं ते न्यवसंस्तत्र प्रच्छन्नाः पुरुषर्षभाः ।
कर्माणि तस्य कुर्वाणा विराटनृपतेस्तदा ॥ ४६

इति श्रीमहाभारते विराटपर्वणि समयपालनपर्वणि जीमूतवधे
त्रयोदशोऽध्यायः ॥ १३ ॥

॥ समाप्तं समयपालनपर्व २ ॥

## कीचकवधपर्व ३

### १४

वैशम्पायन उवाच ।
वसमानेषु पार्थेषु मत्स्यस्य नगरे तदा ।
महारथेषु छन्नेषु मासा दश समाययुः ॥ १
याज्ञसेनी सुदेष्णां तु शुश्रूषन्ती विशाम्पते ।
आवसत् परिचारार्हा सुदुःखं जनमेजय ॥ २
तथा चरन्तीं पाञ्चालीं सुदेष्णाया निवेशने ।
तां देवीं तोषयामास तथा चान्तःपुरस्त्रियः ॥ ३
तस्मिन् वर्षे गतप्राये कीचकस्तु महाबलः ।
सेनापतिर्विराटस्य ददर्श द्रुपदात्मजाम् ॥ ४
तां दृष्ट्वा देवगर्भाभां चरन्तीं देवतामिव ।
कीचकः कामयामास कामबाणप्रपीडितः ॥ ५
स तु कामाग्निसंतप्तः सुदेष्णामभिगम्य वै ।
प्रहसन्निव सेनानीरिदं वचनमब्रवीत् ॥ ६

नेयं मया जातु पुरेह दृष्टा
राज्ञो विराटस्य निवेशने शुभा ।
रूपेण चोन्मादयतीव मां भृशं
गन्धेन जाता मदिरेव भामिनी ॥ ७
का देवरूपा हृदयङ्गमा शुभे
ह्याचक्ष्व मे कस्य कुतोऽत्र शोभने ।
चित्तं हि निर्मथ्य करोति मां वशे
न चान्यदत्रौषधमस्ति मे मतम् ॥ ८

---

व्याकर्षो भ्रमणं तथा । पश्चात्प्रपातनं वेगाद्विकर्षणमुदाहृतम्' ॥३२॥ गतसत्त्वं नष्टबुद्धिमत एवाचेतनं शवभूतम् ॥ ३६ ॥ इति श्रीम० वि० नै० भारतभावदीपे त्रयोदशोऽध्यायः॥१३॥

* शतगुणं शतवारम् ¶ प्रत्यपिंषत्-पिष्टं कृतवान् ।

१४

वसमानेष्विति । अन्यदौषधमेतां विना ॥ ८ ॥

अहो तवेयं परिचारिका शुभा ।
प्रत्यग्ररूपा प्रतिभाति मामियम् ।
अयुक्तरूपं हि करोति कर्म ते
प्रशास्तु मां यच्च ममास्ति किञ्चन ॥ ९
प्रभूतनागाश्वरथं महाजनं
समृद्धियुक्तं बहुपानभोजनम् ।
मनोहरं काञ्चनचित्रभूषणं
गृहं महच्छोभयतामियं मम ॥ १०
ततः सुदेष्णामनुमन्त्र्य कीचक-
स्ततः समभ्येत्य नराधिपात्मजाम् ।
उवाच कृष्णामभिसान्त्वयंस्तदा
मृगेन्द्रकन्यामिव जम्बुको वने ॥ ११
का त्वं कस्यासि कल्याणि कुतो वा त्वं वरानने
प्राप्ता विराटनगरं तत्त्वमाचक्ष्व शोभने ॥ १२
रूपमग्र्यं तथा कान्तिः सौकुमार्यमनुत्तमम् ।
कान्त्या विभाति वक्त्रं ते शशाङ्क इव निर्मलम् ॥
नेत्रे सुविपुले सुभ्रु पद्मपत्रनिभे शुभे ।
वाक्यं ते चारुसर्वाङ्गि परपुष्टरुतोपमम् ॥ १४
एवंरूपा मया नारी काचिदन्या महीतले ।
न दृष्टपूर्वा सुश्रोणि यादृशी त्वमनिन्दिते ॥ १५
लक्ष्मीः पद्मालया का त्वमथ भूतिः सुमध्यमे।
ह्रीः श्रीः कीर्तिरथो कान्तिरासां का त्वं वरानने
अतीव रूपिणी किं त्वमनङ्गाङ्गविहारिणी ।
अतीव भ्राजसे सुभ्रु प्रभेवेन्दोरनुत्तमा ॥ १७
अपि चेक्षणपक्ष्माणां स्मितज्योत्स्नोपमं शुभम् ।
दिव्यांशुरश्मिभिर्वृत्तं दिव्यकान्तिमनोरमम् ॥ १८
निरीक्ष्य वक्त्रचन्द्रं ते लक्ष्म्याऽनुपमया युतम् ।
कृत्स्ने जगति को नेह कामस्य वशगो भवेत्॥१९
हारालङ्कारयोग्यौ तु स्तनौ चोभौ सुशोभनौ ।
सुजातौ सहितौ लक्ष्म्या पीनौ वृत्तौ निरन्तरौ॥
कुड्मलाम्बुरुहाकारौ तव सुभ्रु पयोधरौ ।
कामप्रतोदाविव मां तुदतश्चारुहासिनि ॥ २१
वलीविभङ्गचतुरं स्तनभारविनामितम् ।
कराग्रसंमितं मध्यं तवेदं तनुमध्यमे ॥ २२
दृष्ट्वैव चारु जघनं सरित्पुलिनसंनिभम् ।
कामव्याधिरसाध्यो मामप्याक्रामति भामिनि२३
जज्वाल चाग्निमदनो दावाग्निरिव निर्दयः ।
त्वत्सङ्गमाभिसङ्कल्पविवृद्धो मां दहत्ययम् ॥ २४
आत्मप्रदानवर्षेण संगमाम्भोधरेण च ।
शमयस्व वरारोहे ज्वलन्तं मन्मथानलम् ॥ २५
मच्चित्तोन्मादनकरा मन्मथस्य शरोत्कराः ।
त्वत्संगमाशानिशितास्तीव्राः शशिनिभानने।
मह्यं विदार्य हृदयमिदं निर्दयवेगिताः ॥ २६
प्रविष्टा ह्यसितापाङ्गि प्रचण्डाश्चण्डदारुणाः ।
अत्युन्मादसमारम्भाः प्रीत्युन्मादकरा मम ।
आत्मप्रदानसम्भोगैर्मामुद्धर्तुमिहार्हसि ॥ २७
चित्रमाल्याम्बरधरा सर्वाभरणभूषिता ।
कामं प्रकामं सेव त्वं मया सह विलासिनि २८
नार्हसीहासुखं वस्तुं सुखार्हा सुखवर्जिता ।
प्राप्नुह्यनुत्तमं सौख्यं मत्तस्त्वं मत्तगामिनि ॥ २९
स्वादून्यमृतकल्पानि पेयानि विविधानि च ।
पिबमाना मनोज्ञानि रममाणा यथासुखम् ॥३०
भोगोपचारान् विविधान् सौभाग्यं चाप्यनुत्तमम्
पानं पिब महाभागे भोगैश्चानुत्तमैः शुभैः ॥ ३१
इदं हि रूपं प्रथमं तवानघे
निरर्थकं केवलमद्य भामिनि ।
अधार्यमाणा स्रगिवोत्तमा शुभा
न शोभसे सुन्दरि शोभना सती ॥ ३२
त्यजामि दारान् मम ये पुरातना
भवन्तु दास्यस्तव चारुहासिनि ।
अहं च ते सुन्दरि दासवत् स्थितः
सदा भविष्ये वशगो वरानने ॥ ३३

द्रौपद्युवाच ।

अप्रार्थनीयामिह मां सूतपुत्राभिमन्यसे ।
निहीनवर्णां सैरन्ध्रीं बीभत्सां केशकारिणीम् ३४
परदाराऽस्मि भद्रं ते न युक्तं तव साम्प्रतम् ।
दयिताः प्राणिनां दारा धर्मं समनुचिन्तय ॥ ३५

---

प्रत्यग्ररूपा दिव्यरूपा ॥९॥ परपुष्टः कोकिलः॥१४॥ भूतिः ईश्वरी ऐश्वर्याभिमानिनी देवता ॥१६॥ अनङ्गाङ्गविहारिणी स्मरदेहेन क्रीडन्ती रतिरित्यर्थः॥१७॥ ईक्षणपक्ष्मणां नेत्रपक्ष्मणां स्मितमीषदुन्मीलनं तदेव ज्योत्स्नोपमं मनस आल्हादकरम्। लक्ष्माणमिति पाठे वक्त्रचन्द्रविशेषणम्॥१८॥ सुजातौ उन्नतौ निरन्तरौ पृथुत्वात्संश्लिष्टौ॥२०॥ कुड्मलेति । मुकुलीभूतपद्माकारौ॥२१॥[वलीनां जठरगतरेखाणां विभङ्गेन चतुरं शोभनं]कराग्रमंगुष्ठादिमध्यमांतो वितास्तिस्तेन संमितं कृशमित्यर्थः॥२२॥अग्निमदनो मदनाग्निः॥२४॥अत्युन्मादं मरणकालीनं सन्निपातं समारभन्ते तेऽत्युन्मादसमारम्भाः। त्वदलाभे मरिष्याम्येवेति भावः॥२७॥ कामं स्मरं प्रकाममतिशयितम् ॥२८॥प्राप्नुहि लभस्व ॥२९॥ अभिमन्यसे कामयसे ॥३४॥

परदारे न ते बुद्धिर्जातु कार्या कथंचन।
विवर्जनं ह्यकार्याणामेतत् सुपुरुषव्रतम् ॥ ३६
मिथ्याभिगृध्नो हि नरः पापात्मा मोहमास्थितः
अयशः प्राप्नुयाद्घोरं महद्वा प्राप्नुयाद्भयम् ॥ ३७
वैशम्पायन उवाच ।
एवमुक्तस्तु सैरन्ध्र्या कीचकः काममोहितः।
जानन्नपि सुदुर्बुद्धिः परदाराभिमर्शने ॥ ३८
दोषान् बहून् प्राणहरान् सर्वलोकविगर्हितान्।
प्रोवाचेदं सुदुर्बुद्धिर्द्रौपदीमजितेन्द्रियः ॥ ३९
नार्हस्येवं वरारोहे प्रत्याख्यातुं वरानने ।
मां मन्मथसमाविष्टं त्वत्कृते चारुहासिनि ॥ ४०
प्रत्याख्याय च मां भीरु वशगं प्रियवादिनम् ।
नूनं त्वमसितापाङ्गि पश्चात्तापं करिष्यसि ॥ ४१
अहं हि सुभ्रु राज्यस्य कृत्स्नस्यास्य सुमध्यमे ।
प्रभुर्वासयिता चैव वीर्ये चाप्रतिमः क्षितौ ॥ ४२
पृथिव्यां मत्समो नास्ति कश्चिदन्यः पुमानिह।
रूपयौवनसौभाग्यैर्भोगैश्चानुत्तमैः शुभैः ॥ ४३
सर्वकामसमृद्धेषु भोगेष्वनुपमेष्विह ।
भोक्तव्येषु च कल्याणि कस्माद्दास्ये रता ह्यसि॥
मया दत्तमिदं राज्यं स्वामिन्यसि शुभानने ।
भजस्व मां वरारोहे भुङ्क्ष्व भोगाननुत्तमान् ४५
एवमुक्ता तु सा साध्वी कीचकेनाशुभं वचः।
कीचकं प्रत्युवाचेदं गर्हयन्त्यस्य तद्वचः ॥ ४६
सैरन्ध्र्युवाच ।
मा सूतपुत्र मुह्यस्व माऽद्य त्यक्ष्यस्व जीवितम्।
जानीहि पञ्चभिर्घोरैर्नित्यं मामभिरक्षिताम्॥ ४७
न चाप्यहं त्वया लभ्या गन्धर्वाः पतयो मम ।
ते त्वां निहन्युः कुपिताः साध्वलं मा व्यनीनशः
अशक्यरूपं पुरुषैरध्वानं गन्तुमिच्छसि ।
यथा निश्चेतनो बालः कूलस्थः कूलमुत्तरम् ।
तर्तुमिच्छति मन्दात्मा तथा त्वं कर्तुमिच्छसि४९
अन्तर्महीं वा यदि वोर्ध्वमुत्पतेः
समुद्रपारं यदि वा प्रधावसि ।
तथाऽपि तेषां न विमोक्षमर्हसि
प्रमाथिनो देवसुता हि खेचराः ॥ ५०
त्वं कालरात्रीमिव कश्चिदातुरः
किं मां दृढं प्रार्थयसेऽद्य कीचक।
किं मातुरङ्के शयितो यथा शिशु-
श्चन्द्रं जिघृक्षुरिव मन्यसे हि माम् ॥५१
तेषां प्रियां प्रार्थयतो न ते भुवि
गत्वा दिवं वा शरणं भविष्यति ।
न वर्तते कीचक ते दृशा शुभं
या तेन संजीवनमर्थयेत सा ॥ ५२

इति श्रीमहाभारते विराटपर्वणि कीचकवधपर्वणि कीचककृष्णसंवादे चतुर्दशोऽध्यायः ॥ १४ ॥

## १५

वैशम्पायन उवाच ।
प्रत्याख्यातो राजपुत्र्या सुदेष्णां कीचकोऽब्रवीत्
अमर्यादेन कामेन घोरेणाभिपरिप्लुतः ॥ १
यथा कैकेयि सैरन्ध्री समेयात्तद्विधीयताम् ।
येनोपायेन सैरन्ध्री भजेन्मां गजगामिनी ।
तं सुदेष्णे परीप्सस्व प्राणान्मोहात् प्रहासिषम् २

---

मिथ्याभिगृध्नो वितथाभिनिवेशी महद्भयं मृत्युम् ॥ ३७ ॥ मन्यसे लिप्ससे। शिशोश्चन्द्रवदहं तव दुर्लभाऽस्मीति भावः ॥ ५१ ॥ तेषां प्रियामिति। तेषां प्रसिद्धानां गन्धर्वाणां प्रियां प्रार्थयतस्ते तव भुवि गत्वा दिवं वा गत्वा शरणं त्राता कश्चिन्न भविष्यति। अत एव हे कीचक ते तव कामान्धस्य सा दृशा दृष्टिर्बुद्धिरिति यावत् या शुभं स्वीयमर्थयेत कामयेत। शुभेच्छारूपा तव नास्तीत्यर्थः। तेन च शुभेन परदारनिवृत्तिरूपेण कामितेन सञ्जीवनं भवतीति शेषः। अन्यथा मरिष्यसीत्यर्थः। न मे भुवीति पाठे तेषां प्रियां प्रार्थयतो मे मम कोऽपि त्राता न भविष्यतीति दृशा बुद्धिस्तव नास्तीति सम्बन्धः। या ते च संजीवनमर्थयत्तामिति पाठे तु या दृष्टिस्ते तव संजीवनं च भवति कीदृशं संजीवनं अर्थयत्तं वस्त्वधीनम्। तस्माद्वितथाभिनिवेशिनस्ते जीवनं नास्तीत्यर्थः ॥ ५२ ॥ इति श्रीमहाभारते विराटपर्वणि नैलकण्ठीये भारतभावदीपे चतुर्दशोऽध्यायः ॥ १४ ॥

१५

**प्रत्याख्यात इति।** समेयात् मामुपगच्छेत् मा ऊहादिति छेदः। ऊहात् वितर्कात्तमुपायं युक्त्या परीप्सस्वेति योज्यम्। प्राणान् मा प्रहासिषमिति च ॥ २ ॥

वैशम्पायन उवाच ।

तस्य सा बहुशः श्रुत्वा वाचं विलपतस्तदा ।
विराटमहिषी देवी कृपां चक्रे मनस्विनी ॥ ३
स्वमर्थमभिसन्धाय तस्यार्थमनुचिन्त्य च ।
उद्योगं चैव कृष्णायाः सुदेष्णा सूतमब्रवीत् ॥ ४
पर्वणि त्वं समुद्दिश्य सुरामन्नं च कारय ।
तत्रैनां प्रेषयिष्यामि सुराहारीं तवान्तिकम् ॥ ५
तत्र संप्रेषितामेनां विजने निरवग्रहे ।
सान्त्वयेथा यथाकामं सान्त्व्यमाना रमेद्यदि॥ ६

वैशम्पायन उवाच ।

इत्युक्तः स विनिष्क्रम्य भगिन्या वचनात्तदा ।
सुरामाहारयामास राजार्हां सुपरिष्कृताम् ॥ ७
†भक्षांश्च विविधाकारान् बहूंश्चोच्चावचांस्तदा ।
कारयामास कुशलैरन्नं पानं सुशोभनम् ॥ ८
तस्मिन् कृते तदा देवी कीचकेनोपमन्त्रिता ।
सुदेष्णा प्रेषयामास सैरन्ध्रीं कीचकालयम् ॥ ९

सुदेष्णोवाच ।

उत्तिष्ठ गच्छ सैरन्ध्रि कीचकस्य निवेशनम् ।
पानमानय कल्याणि पिपासा मां प्रबाधते ॥ १०

सैरन्ध्र्युवाच ।

न गच्छेयमहं तस्य राजपुत्रि निवेशनम् ।
त्वमेव राज्ञि जानासि यथा स निरपत्रपः ॥ ११
न चाहमनवद्याङ्गि तव वेश्मनि भामिनि ।
कामवृत्ता भविष्यामि पतीनां व्यभिचारिणी ॥
त्वं चैव देवि जानासि यथा स समयः कृतः ।
प्रविशन्त्या मया पूर्वं तव वेश्मनि भामिनि॥१३
कीचकस्तु सुकेशान्ते मूढो मदनदर्पितः ।
सोऽवमंस्यति मां दृष्ट्वा न यास्ये तत्र शोभने १४
सन्ति बह्व्यस्तव प्रेष्या राजपुत्रि वशानुगाः ।
अन्यां प्रेषय भद्रं ते स हि मामवमंस्यते ॥ १५

सुदेष्णोवाच ।

नैव त्वां जातु हिंस्यात् स इतः संप्रेषिता मया ।
इत्युक्त्वा प्रददौ पात्रं सपिधानं हिरण्मयम् १६
सा शङ्कमाना रुदती दैवं शरणमीयुषी ।
प्रातिष्ठत सुराहारी कीचकस्य निवेशनम् ॥ १७

सैरन्ध्र्युवाच ।

यथाऽहमन्यं भर्तृभ्यो नाभिजानामि कंचन ।
तेन सत्येन मां प्राप्तां मा कुर्यात् कीचको वशे ॥

वैशम्पायन उवाच ।

उपातिष्ठत सा सूर्यं मुहूर्तमबला ततः ।
स तस्यास्तनुमध्यायाः सर्वं सूर्योऽवबुद्धवान् १९
अन्तर्हितं ततस्तस्या रक्षो रक्षार्थमादिशत् ।
तच्चैनां नाजहात्तत्र सर्वावस्थास्वनिन्दिताम् २०
तां मृगीमिव सन्त्रस्तां दृष्ट्वा कृष्णां समीपगाम् ।
उदतिष्ठन्मुदा सूतो नावं लब्ध्वेव पारगः ॥ २१

इति श्रीमहाभारते विराटपर्वणि कीचकवधपर्वणि द्रौपदीसुराहरणे पञ्चदशोऽध्यायः ॥ १५ ॥

## १६

कीचक उवाच ।

स्वागतं ते सुकेशान्ते सुव्युष्टा रजनी मम ।
स्वामिनी त्वमनुप्राप्ता प्रकुरुष्व मम प्रियम् ॥ १
सुवर्णमालाः *कम्बूश्च कुण्डले परिहाटके ।
नानापत्तनजे शुभ्रे मणिरत्नं च शोभनम् ॥ २
आहरन्तु च वस्त्राणि कौशिकान्यजिनानि च ।
अस्ति मे शयनं दिव्यं त्वदर्थमुपकल्पितम् ।
एहि तत्र मया सार्द्धं पिबस्व मधुमाधवीम् ॥ ३

---

कृष्णायाः प्राप्त्यर्थे उद्योगमुद्यमं चानुचिन्त्येति योज्यम् ॥४॥ पर्वणि मद्यपायिनामुत्सवकाले चतुर्दश्यादौ। समुद्दिश्य अद्याहं सुदेष्णार्थमन्नादिकं कारयामीति कीर्तयित्वा–ख्यापयित्वा ॥ ५ ॥ विजने एकान्ते निरवग्रहे निष्प्रातिबन्धे ॥ ६ ॥ उपमान्त्रिता प्रार्थिता ॥ ९ ॥ पानं मद्यं सुरामन्नं चेत्युपक्रमात् तस्यैव पिपासा पातुमिच्छा ॥ १० ॥ इति श्रीमहाभारते विराटपर्वणि नैलकण्ठीये भारतभावदीपे पञ्चदशोऽध्यायः ॥ १५ ॥ † भक्ष्यांश्च–क,–ङ.

१६

**स्वागतमिति**। परितो हाटके ययोस्ते परिहाटके कुण्डले ताटङ्के इत्यर्थः ॥२॥ मधुमाधवीं मधुपुष्पजां मदिराम् ॥३॥

* कम्बूः शङ्खघटितवलयानि ।

द्रौपद्युवाच ।
अप्रैषीद्राजपुत्री मां सुराहारीं तवान्तिकम् ।
पानमाहर मे क्षिप्रं पिपासा मेऽति चाब्रवीत् ॥४
कीचक उवाच ।
अन्या भद्रे नयिष्यन्ति राजपुत्र्याः प्रतिश्रुतम् ।
इत्येतां दक्षिणे पाणौ सूतपुत्रः परामृशत् ॥ ५
द्रौपद्युवाच ।
यथैवाहं नाभिचरे कदाचित्
पतीन् मदाद्वै मनसाऽपि जातु ।
तेनैव सत्येन वशीकृतं त्वां
द्रष्टाऽस्मि पापं परिकृष्यमाणम् ॥ ६
वैशम्पायन उवाच ।
स तामभिप्रेक्ष्य विशालनेत्रां
जिघृक्षमाणः परिभर्त्सयन्तीम् ।
जग्राह तामुत्तरवस्त्रदेशे
स कीचकस्तां सहसाऽऽक्षिपन्तीम् ॥७
प्रगृह्यमाणा तु महाजवेन
मुहुर्विनिःश्वस्य च राजपुत्री ।
तया समाक्षिप्ततनुः स पापः
पपात शाखीव निकृत्तमूलः ॥ ८
सा गृहीता विधुन्वाना भूमावाक्षिप्य कीचकम् ।
सभां शरणमागच्छद्यत्र राजा युधिष्ठिरः ॥ ९
तां कीचकः प्रधावन्तीं केशपाशे परामृशत् ।
अथैनां पश्यतो राज्ञः पातयित्वा पदाऽवधीत् ॥
तस्य योऽसौ तदाऽर्केण राक्षसः संनियोजितः ।
स कीचकमपोवाह वातवेगेन भारत ॥ ११
स पपात तदा भूमौ रक्षोबलसमाहतः ।
विघूर्णमानो निश्चेष्टश्छिन्नमूल इव द्रुमः ॥ १२
तां चासीनौ ददृशतुर्भीमसेनयुधिष्ठिरौ ।
अमृष्यमाणौ कृष्णायाः कीचकेन पराभवम् ॥१३
तस्य भीमो वधं प्रेप्सुः कीचकस्य दुरात्मनः ।
दन्तैर्दन्तांस्तदा रोषान्निष्पिपेष महामनाः ॥ १४
धूमच्छाया ह्यभजतां नेत्रे चोच्छ्रितपक्ष्मणी ।
सस्वेदा भृकुटी चोग्रा ललाटे समवर्तत ॥ १५
हस्तेन ममृदे चैव ललाटं परवीरहा ।
भूयश्च त्वरितः क्रुद्धः सहसोत्थातुमैच्छत ॥ १६
अथावमृद्नादङ्गुष्ठमङ्गुष्ठेन युधिष्ठिरः ।
प्रबोधनभयाद्राजा भीमं तं प्रत्यषेधयत् ॥ १७
तं मत्तमिव मातङ्गं वीक्षमाणं वनस्पतिम् ।
स तमावारयामास भीमसेनं युधिष्ठिरः ॥ १८
आलोकयसि किं वृक्षं सूद दारुकृतेन वै ।
यदि ते दारुभिः कृत्यं बहिर्वृक्षान्निगृह्यताम् ॥१९
सा सभाद्वारमासाद्य रुदती मत्स्यमब्रवीत् ।
अवेक्षमाणा सुश्रोणी पतींस्तान् दीनचेतसः॥ २०
आकारमभिरक्षन्ती प्रतिज्ञां धर्मसंहिताम् ।
दह्यमानेव रौद्रेण चक्षुषा द्रुपदात्मजा ॥ २१
द्रौपद्युवाच ।
येषां वैरी न स्वपिति षष्ठेऽपि विषये वसन् ।
तेषां मां मानिनीं भार्यां सूतपुत्रः पदाऽवधीत्२२
ये दद्युर्न च याचेयुर्ब्रह्मण्याः सत्यवादिनः ।
तेषां मां मानिनीं भार्यां सूतपुत्रः पदाऽवधीत् ॥
येषां दुन्दुभिनिर्घोषो ज्याघोषः श्रूयतेऽनिशम् ।
तेषां मां मानिनीं भार्यां सूतपुत्रः पदाऽवधीत् ॥
ये च तेजस्विनो दान्ता बलवन्तोऽतिमानिनः ।
तेषां मां मानिनीं भार्यां सूतपुत्रः पदाऽवधीत् ॥
सर्वलोकमिमं हन्युर्धर्मपाशसितास्तु ये ।
तेषां मां मानिनीं भार्यां सूतपुत्रः पदाऽवधीत् ॥
शरणं ये प्रपन्नानां भवन्ति शरणार्थिनाम् ।
चरन्ति लोके प्रच्छन्नाः क्व नु तेऽद्य महारथाः २७
कथं ते सूतपुत्रेण वध्यमानां प्रियां सतीम् ।
मर्षयन्ति यथा क्लीबा बलवन्तोऽमितौजसः ॥ २८
क्व नु तेषाममर्षश्च वीर्यं तेजश्च वर्तते ।
न परीप्सन्ति ये भार्यां वध्यमानां दुरात्मना॥२९
मयाऽत्र शक्यं किं कर्तुं विराटे धर्मदूषके ।
यः पश्यन्मां मर्षयति वध्यमानामनागसम् ॥ ३०
न राजा राजवत्किञ्चित् समाचरति कीचके ।
दस्यूनामिव धर्मस्ते न हि संसदि शोभते ॥ ३१

---

सुराहारीं सुरामाहर्तुकामां पिपासा मेऽति मे मम अतिपिपासा ॥ ४ ॥ विधुन्वाना कम्पमाना ॥ ९ ॥ अपोवाह दूरीचकार ॥११॥ धूमच्छायाः कर्म, नेत्रे कर्तृणी अभजताम् । छाया-मित्येकवचनान्तः पाठः स्वच्छः ॥ १५ ॥ अङ्गुष्ठं पादाङ्गुष्ठं अङ्गुष्ठेन हस्ताङ्गुष्ठेन आचारादेवं ज्ञेयम् ॥१७॥ अभिरक्षन्ती गूहमाना । धर्मसंहिता धर्मबद्धा ॥ २१ ॥ षष्ठे विषये देश-पञ्चकव्यवधानेऽपि न स्वपिति । तेषां सार्वभौमत्वात् । यद्वा बाह्येन्द्रियग्राह्यपञ्चविषयापेक्षया षष्ठे मनोमात्रग्राह्ये स्वप्नमनो-रथादिरूपेऽपि विषये न स्वपिति भयार्दितः सन् किमुत लोके न स्वपितीत्यर्थः ॥ २२ ॥ सिताः बद्धाः ॥ २६ ॥

नाहमेतेन युक्तं वै हन्तुं मत्स्य तवान्तिके।
सभासदोऽत्र पश्यन्तु कीचकस्य व्यतिक्रमम्॥३२
कीचको न च धर्मज्ञो न च मत्स्यः कथंचन।
सभासदोऽप्यधर्मज्ञा य एनं पर्युपासते॥ ३३

वैशम्पायन उवाच।

एवंविधैर्वचोभिः सा तदा कृष्णाऽश्रुलोचना।
उपालभत राजानं मत्स्यानां वरवर्णिनी॥ ३४

विराट उवाच।

परोक्षं नाभिजानामि +विग्रहं युवयोरहम्।
अर्थतत्त्वमविज्ञाय किं नु स्यात् कौशलं मम॥३५

वैशम्पायन उवाच।

ततस्तु सभ्या विज्ञाय कृष्णां भूयोऽभ्यपूजयन्।
साधु साध्विति चाप्याहुः कीचकं च व्यगर्हयन्

सभ्या ऊचुः।

यस्येयं चारुसर्वाङ्गी भार्या स्यादायतेक्षणा।
परो लाभस्तु तस्य स्यान्न च शोचेत् कथंचन३७
न हीदृशी मनुष्येषु सुलभा वरवर्णिनी।
नारी सर्वानवद्याङ्गी देवीं मन्यामहे वयम्॥ ३८

वैशम्पायन उवाच।

एवं संपूजयन्तस्ते कृष्णां प्रेक्ष्य सभासदः।
युधिष्ठिरस्य कोपात्तु ललाटे स्वेद आगमत्॥३९
अथाब्रवीद्राजपुत्रीं कौरव्यो महिषीं प्रियाम्।
गच्छ सैरन्ध्रि माऽत्र स्थाः सुदेष्णाया निवेशनम्
भर्तारमनुरुन्धन्त्यः क्लिश्यन्ते वीरपत्नयः।
शुश्रूषया क्लिश्यमानाः पतिलोकं जयन्त्युत॥ ४१
मन्ये न कालं क्रोधस्य पश्यन्ति पतयस्तव।
तेन त्वां नाभिधावन्ति गन्धर्वाः सूर्यवर्चसः ४२
अकालज्ञाऽसि सैरन्ध्रि शैलूषीव विरोदिषि।
विघ्नं करोषि मत्स्यानां दीव्यतां राजसंसदि॥४३
गच्छ सैरन्ध्रि गन्धर्वाः करिष्यन्ति तव प्रियम्।
व्यपनेष्यन्ति ते दुःखं येन ते विप्रियं कृतम्॥ ४४

सैरन्ध्र्युवाच।

अतीव तेषां घृणिनामर्थेऽहं धर्मचारिणी।
तस्य तस्यैव ते वध्या येषां ज्येष्ठोऽक्षदेविता॥४५

वैशम्पायन उवाच।

इत्युक्त्वा प्राद्रवत् कृष्णा सुदेष्णाया निवेशनम्।
केशान् मुक्त्वा च सुश्रोणी संरम्भाल्लोहितेक्षणा४६
शुशुभे वदनं तस्या रुदत्याः सुचिरं तदा।
मेघलेखाविनिर्मुक्तं दिवीव शशिमण्डलम्॥ ४७

सुदेष्णोवाच।

कस्त्वाऽवधीद्वरारोहे कस्माद्रोदिषि शोभने।
कस्याद्य न सुखं भद्रे केन ते विप्रियं कृतम्॥ ४८

द्रौपद्युवाच।

कीचको माऽवधीत्तत्र सुराहारीं गतां तव।
सभायां पश्यतो राज्ञो यथैव विजने वने॥ ४९

सुदेष्णोवाच।

घातयामि सुकेशान्ते कीचकं यदि मन्यसे।
योऽसौ त्वां कामसंमत्तो दुर्लभामवमन्यते॥५०

सैरन्ध्र्युवाच।

अन्ये चैनं वधिष्यन्ति येषामागः करोति सः।
मन्ये चैवाद्य सुव्यक्तं यमलोकं गमिष्यति॥ ५१

इति श्रीमहाभारते विराटपर्वणि कीचकवधपर्वणि द्रौपदीपरिभवे षोडशोऽध्यायः॥ १६॥

## १७

वैशम्पायन उवाच।

सा हता सूतपुत्रेण राजपत्नी यशस्विनी।
वधं कृष्णा परीप्सन्ती सेनावाहस्य भामिनी॥१
जगामावासमेवाथ सा तदा द्रुपदात्मजा।
कृत्वा शौचं यथान्यायं कृष्णा सा तनुमध्यमा॥२

---

कौशलं साध्वसाधुनिर्णये इति शेषः। किं नु कथं नु॥३५॥ माऽत्र स्थाः अत्र मा स्थाः मा तिष्ठ॥ ४०॥ शैलूषीव नटीव निर्लज्जा॥ ४३॥ दुःख दुःखयितारं व्यपनेष्यन्ति जीवितादिति शेषः॥ ४४॥ घृणिनां दयावतां तेषामर्थे। तस्य तस्य सर्वस्यैव ते वध्याः स्युः॥ ४५॥ पश्यतो राज्ञ इत्यनादरे षष्ठी, राजानं लक्षीकृत्येत्यर्थः॥ ४९॥ इति श्रीमहाभारते विराटपर्वणि नैलकण्ठीये भारतभावदीपे षोडशोऽध्यायः॥ १६॥ + विग्रहं कलहम्।

१७

सेति। सेनावाहस्य सेनापतेः कीचकस्य॥ १॥

गात्राणि वाससी चैव प्रक्षाल्य सलिलेन सा ।
चिन्तयामास रुदती तस्य दुःखस्य निर्णयम् ॥ ३
किं करोमि क्व गच्छामि कथं कार्यं भवेन्मम ।
इत्येवं चिन्तयित्वा सा भीमं वै मनसाऽगमत् ॥ ४
नान्यः कर्ता ऋते भीमान्ममाद्य मनसः प्रियम् ।
तत उत्थाय रात्रौ सा विहाय शयनं स्वकम् ॥ ५
प्राद्रवन्नाथमिच्छन्ती कृष्णा नाथवती सती ।
भवनं भीमसेनस्य क्षिप्रमायतलोचना ॥ ६
दुःखेन महता युक्ता मानसेन मनस्विनी ।

सैरन्ध्र्युवाच ।

तस्मिन् जीवति पापिष्ठे सेनावाह मम द्विषि ७
तत् कर्म कृतवानद्य कथं निद्रां निषेवसे ।

वैशम्पायन उवाच ।

एवमुक्त्वाऽथ तां शालां प्रविवेश मनस्विनी ॥ ८
यस्यां भीमस्तथा शेते मृगराज इव श्वसन् ।
तस्या रूपेण सा शाला भीमस्य च महात्मनः ॥ ९
संमूर्छितेव कौरव्य प्रजज्वाल च तेजसा ।
सा वै महानसं प्राप्य भीमसेनं शुचिस्मिता १०
सर्वश्वेतेव माहेयी वने जाता त्रिहायणी ।
उपातिष्ठत पाञ्चाली वासितेव वरर्षभम् ॥ ११
सा लतेव महाशालं फुल्लं गोमतितीरजम् ।
परिष्वजत पाञ्चाली मध्यमं पाण्डुनन्दनम् ॥ १२
बाहुभ्यां परिरभ्यैनं प्राबोधयदनिन्दिता ।
सिंहं सुप्तं वने दुर्गे मृगराजवधूरिव ॥ १३
भीमसेनमुपाश्लिष्यद्धस्तिनीव महागजम् ।
वीणेव मधुरालापा गान्धारं साधु मूर्छती ।
अभ्यभाषत पाञ्चाली भीमसेनमनिन्दिता ॥ १४
उत्तिष्ठोत्तिष्ठ किं शेषे भीमसेन यथा मृतः ।
नामृतस्य हि पापीयान् भार्यामालभ्य जीवति ॥ १५
स संप्रहाय शयनं राजपुत्र्या प्रबोधितः ।
उपातिष्ठत मेघाभः पर्यङ्के सोपसंग्रहे ॥ १६
अथाब्रवीद्राजपुत्रीं कौरव्यो महिषीं प्रियाम् ।
केनास्यर्थेन संप्राप्ता त्वरितेव ममान्तिकम् ॥ १७
न ते प्रकृतिमान् वर्णः कृशा पाण्डुश्च लक्ष्यसे ।
आचक्ष्व परिशेषेण सर्वं विद्यामहं यथा ॥ १८
सुखं वा यदि वा दुःखं द्वेष्यं वा यदि वा प्रियम् ।
यथावत् सर्वमाचक्ष्व श्रुत्वा ज्ञास्यामि यत् क्षमम् ॥ १९
अहमेव हि ते कृष्णे विश्वास्यः सर्वकर्मसु ।
अहमापत्सु चापि त्वां मोक्षयामि पुनः पुनः २०
शीघ्रमुक्त्वा यथाकामं यत्ते कार्यं विवक्षितम् ।
गच्छ वै शयनायैव पुरा नान्येन बुध्यते ॥ २१

इति श्रीमहाभारते विराटपर्वणि कीचकवधपर्वणि द्रौपदीभीमसंवादे सप्तदशोऽध्यायः ॥ १७ ॥

यः तत्कर्म पदाहातिरूपं कृतवान् तास्मिन् जीवति ॥ ७ ॥ संमूर्छितेव वृद्धिं शोभारूपां प्राप्तेव प्रजज्वाल अशोभत ॥ १० ॥ सर्वश्वेतेवेति । पाञ्चाली द्रौपदी वरर्षभं वरणीयं पतिं श्रेष्ठं भीमसेनमुपलक्ष्य वासितेव पुष्पिणीत्वेन कामातुरेव उपातिष्ठत समीपे स्थितवती । वस्तुतो न कामातुरा किं तु द्वेषातुरैवेति भावः । तत्र दृष्टान्तद्वयम् । इव शब्दः काकाक्षिवदुभयत्र सम्बध्यते सर्वश्वेतेव माहेयीव चेति । सर्वश्वेता बकी यथा कामातुरा वरर्षभं पतिमिति एकः । तस्याः कामातुरत्वे हेतुः वने जातेति । जले जाता तेन जलसामीप्ये लब्धाहारत्वेन उन्मत्तत्वं सूच्यते । तथा माहेयी गौः साऽपि वासिता सती वरर्षभं साण्डं बलीवर्दम् । तस्या अपि वासितात्वे विशेषणं त्रिहायणीति । त्रिवर्षा हि गौर्यौवनारूढा कामातुरा च भवति । *अन्ये तु 'श्वेतः सिते राजहंसे कैलासे द्विपभूपयोः' इति कोशमुदाहृत्य सर्वश्वेता हंसीति व्याचक्षते । तत्र सर्वपदं व्यर्थं हंसस्य लोहितलोचनास्यचरणत्वात् प्रतिकूलं च । यद्यपि 'त्रिहायणी त्रिवर्षा गौः' इति च कोशात् त्रिहायणीपदेनैव गौर्लभ्यते तथापि तत्कामातुरत्वज्ञापनार्थमुपक्षीणं सद्विशेष्यसमर्पकं पदान्तरमपेक्षत एवेति न व्यर्थविशेषणत्वम् । अन्ये व्याख्यानप्रकाराः सर्वेऽनेनैव दोषेण ग्रस्ता इत्युपेक्षिताः ॥ ११ ॥ मध्यमं पाण्डुनन्दनं भीमसेनम् । यमयोः सहजातत्वेन पौर्वापर्याभावात्तौ कनिष्ठावेव । युधिष्ठिरो ज्येष्ठ एव । मध्यमत्वं भीमार्जुनयोरेव विश्रान्तं तत्रापि अत्र प्रकरणात् अर्जुनस्य संप्रति पुंस्त्वाभावाच्च मध्यमत्वं भीमसेने एव मुख्यमित्याशयेनैवैतदुक्तम् । परिष्वजत पर्यष्वजत आलिङ्गितवती ॥ १२ ॥ गान्धारं स्वरविशेषं मूर्छती मूर्छयन्ती ॥ १४ ॥ सोपसङ्ग्रहे सतूलिके ॥ १६ ॥ विद्यां जानीयाम् ॥ १८ ॥ ज्ञास्यामि उपायं चिन्तयिष्यामि क्षमं योग्यम् ॥ १९ ॥ इति श्रीमहाभारते विराटपर्वणि नैलकण्ठीये भारतभावदीपे सप्तदशोऽध्यायः ॥ १७ ॥ * दुर्घटप्रकाशिनीकारादयः ।

## १८

द्रौपद्युवाच ।
अशोच्यत्वं कुतस्तस्या यस्या भर्ता युधिष्ठिरः ।
जानन् सर्वाणि दुःखानि किं मां त्वं परिपृच्छसि
यन्मां दासीप्रवादेन प्रातिकामी तदाऽनयत् ।
सभापरिषदो मध्ये तन्मां दहति भारत ॥ २
पार्थिवस्य सुता नाम का नु जीवति मादृशी ।
अनुभूयेदृशं दुःखमन्यत्र द्रौपदीं प्रभो ॥ ३
वनवासगतायाश्च सैन्धवेन दुरात्मना ।
परामर्शो द्वितीयो वै सोढुमुत्सहते तु का ॥ ४
मत्स्यराज्ञः समक्षं तु तस्य धूर्तस्य पश्यतः ।
कीचकेन परामृष्टा का नु जीवति मादृशी ॥ ५
एवं बहुविधैः क्लेशैः क्लिश्यमानां च भारत ।
न मां जानासि कौन्तेय किं फलं जीवितेन मे ६
योऽयं राज्ञो विराटस्य कीचको नाम भारत ।
सेनानीः पुरुषव्याघ्र स्यालः परमदुर्मतिः ॥ ७
स मां सैरन्ध्रिवेषेण वसन्तीं राजवेश्मनि ।
नित्यमेवाह दुष्टात्मा भार्या मम भवेति वै ॥ ८
तेनोपमन्त्र्यमाणाया वधार्हेण सपत्नहन्
कालेनेव फलं पक्वं हृदयं मे विदीर्यते ॥ ९
भ्रातरं च विगर्हस्व ज्येष्ठं दुर्द्यूतदेविनम् ।
यस्याऽस्मि कर्मणा प्राप्ता दुःखमेतदनन्तकम्१०
को हि राज्यं परित्यज्य सर्वस्वं चात्मना सह ।
प्रव्रज्यायैव दीव्येत विना दुर्द्यूतदेविनम् ॥ ११
यदि निष्कसहस्रेण यच्चान्यत् सारवद्धनम् ।
सायंप्रातरदेविष्यदपि संवत्सरान् बहून् ॥ १२
रुक्मं हिरण्यं वासांसि यानं युग्यमजाविकम् ।
अश्वाश्वतरसङ्घांश्च न जातु क्षयमावहेत् ॥ १३
सोऽयं द्यूतप्रवादेन श्रियः प्रत्यवरोपितः ।
तूष्णीमास्ते यथा मूढः स्वानि कर्माणि चिन्तयन्
दश नागसहस्राणि हयानां हेममालिनाम् ।
यं यान्तमनुयान्तीह सोऽयं द्यूतेन जीवति ॥ १५
रथाः शतसहस्राणि नृपाणाममितौजसाम् ।
उपासन्त महाराजमिन्द्रप्रस्थे युधिष्ठिरम् ॥ १६
शतं दासीसहस्राणां यस्य नित्यं महानसे ।
पात्रीहस्तं दिवारात्रमतिथीन् भोजयत्युत ॥ १७
एष निष्कसहस्राणि प्रदाय ददतां वरः ।
द्यूतजेन ह्यनर्थेन महता समुपाश्रितः ॥ १८
एनं हि स्वरसंपन्ना बहवः सूतमागधाः ।
सायंप्रातरुपातिष्ठन्सुमृष्टमणिकुण्डलाः ॥ १९
सहस्रमृषयो यस्य नित्यमासन् सभासदः ।
तपःश्रुतोपसंपन्नाः सर्वकामैरुपस्थिताः ॥ २०
अष्टाशीतिसहस्राणि स्नातका गृहमेधिनः ।
त्रिंशद्दासीक एकैको यान् बिभर्ति युधिष्ठिरः २१
अप्रतिग्राहिणां चैव यतीनामूर्ध्वरेतसाम् ।
दश चापि सहस्राणि सोऽयमास्ते नरेश्वरः २२
आनृशंस्यमनुक्रोशं संविभागस्तथैव च ।
यस्मिन्नेतानि सर्वाणि सोऽयमास्ते नरेश्वरः २३
अन्धान्वृद्धांस्तथाऽनाथान्बालान् राष्ट्रेषु दुर्गतान्
बिभर्ति विविधान् राजा धृतिमान् सत्यविक्रमः
संविभागमना नित्यमानृशंस्याद्युधिष्ठिरः ॥ २४
स एष निरयं प्राप्तो मत्स्यस्य परिचारकः ।
सभायां देविता राज्ञः कङ्को ब्रूते युधिष्ठिरः॥ २५
इन्द्रप्रस्थे निवसतः समये यस्य पार्थिवाः ।
आसन् बलिभृतः सर्वे सोऽद्यान्यैर्भृतिमिच्छति ॥
पार्थिवाः पृथिवीपाला यस्यासन् वशवर्तिनः । २७
स वशे विवशो राजा परेषामद्य वर्तते ॥
प्रताप्य पृथिवीं सर्वां रश्मिमानिव तेजसा ।
सोऽयं राज्ञो विराटस्य सभास्तारो युधिष्ठिरः॥
यमुपासन्त राजानः सभायामृषिभिः सह
तमुपासीनमद्यान्यं पश्य पाण्डव पाण्डवम् ॥ २९
सदस्यं समुपासीनं परस्य प्रियवादिनम् ।
दृष्ट्वा युधिष्ठिरं कोपो वर्धते मामसंशयम् ॥ ३०
अतदर्हं महाप्राज्ञं जीवितार्थेऽभिसंस्थितम् ।
दृष्ट्वा कस्य न दुःखं स्याद्धर्मात्मानं युधिष्ठिरम्३१

१८

अशोच्यमिति। सभा शाला तस्यां परिषत् जनसमाजस्तस्य मध्ये । तदा द्यूतकाले ॥२॥ सैन्धवेन जयद्रथेन ॥४॥ प्रव्रज्यं प्रव्रजनम् 'व्रजयजोर्भावे क्यप्' तस्मै प्रव्रज्याय॥११॥ निष्कः सुवर्णपलं तेषां सहस्रेण ॥ १२ ॥ रुक्मं स्वर्णरूपं हिरण्यं 'तस्माद्रजत॰हिरण्यमश्रुजम्' इति श्रुतौ हिरण्यशब्दस्य रजतेऽपि दर्शनात् । यानं गजादि । युग्यं युगोपेतं रथशकटादि । अश्वा वडवा ॥ १३ ॥ यतीनां दशसहस्राणि बिभर्तीति पूर्वेणान्वयः ॥ २२ ॥ आनृशंस्यमनैष्ठुर्यमनुक्रोशं दयाम् ॥ २३ ॥ निरयं पारतन्त्र्यं, कङ्कोऽहमिति युधिष्ठिरो ब्रूते । कङ्कव्रतयुधिष्ठिर इति पाठे कङ्कव्रतश्चासौ युधिष्ठिरश्चेति समासः ॥ २५ ॥ सदस्यं सभासदम् ॥३०॥

उपास्ते स्म सभायां यं कृत्स्ना वीर वसुन्धरा।
तमुपासीनमप्यन्यं पश्य भारत भारतम् ॥ ३२
एवं बहुविधैर्दुःखैः पीड्यमानामनाथवत्।
शोकसागरमध्यस्थां किं मां भीम न पश्यसि३३

इति श्रीमहाभारते विराटपर्वणि कीचकवधपर्वणि द्रौपदीभीमसंवादे अष्टादशोऽध्यायः ॥ १८ ॥

## १९

द्रौपद्युवाच।
इदं तु ते महद्दुःखं यत् प्रवक्ष्यामि भारत।
न मेऽभ्यसूया कर्तव्या दुःखादेतद्ब्रवीम्यहम् ॥ १
सूदकर्मणि हीने त्वमसमे भरतर्षभ।
ब्रुवन् बल्लवजातीयः कस्य शोकं न वर्धयेः ॥ २
सूपकारं विराटस्य बल्लवं त्वां विदुर्जनाः।
प्रेष्यत्वं समनुप्राप्तं ततो दुःखतरं नु किम् ॥ ३
यदा महानसे सिद्धे विराटमुपतिष्ठसि।
ब्रुवाणो बल्लवः सूदस्तदा सीदति मे मनः ॥ ४
यदा प्रहृष्टः सम्राट् त्वां संयोधयति कुञ्जरैः।
हसन्त्यन्तःपुरे नार्यो मम तूद्विजते मनः ॥ ५
शार्दूलैर्महिषैः सिंहैरागारे योध्यसे यदा।
कैकेय्याः प्रेक्षमाणायास्तदा मे कश्मलं भवेत्॥६
तत उत्थाय कैकेयी सर्वास्ताः प्रत्यभाषत।
प्रेष्याः समुत्थिताश्चापि कैकेयीं ताः स्त्रियोऽब्रुवन्
प्रेक्ष्य मामनवद्याङ्गीं कश्मलोपहतामिव।
स्नेहात् संवासजाद्धर्मात् सूदमेषा शुचिस्मिता॥
योध्यमानं महावीर्यमियं समनुशोचति।
†कल्याणरूपा सैरन्ध्री बल्लवश्चापि सुन्दरः ॥ ९
स्त्रीणां चित्तं च दुर्ज्ञेयं युक्तरूपौ च मे मतौ।
सैरन्ध्री प्रियसंवासान्नित्यं करुणवादिनी ॥ १०
अस्मिन् राजकुले चेमौ तुल्यकालनिवासिनौ।
इति ब्रुवाणा वाक्यानि सा मां नित्यमतर्जयत्११
क्रुध्यन्तीं मां च संप्रेक्ष्य समशङ्कत मां त्वयि।
तस्यां तथा ब्रुवत्यां तु दुःखं मां महदाविशत्१२
त्वय्येवं निरयं प्राप्ते भीमे भीमपराक्रमे।
शोके यौधिष्ठिरे मग्ना नाहं जीवितुमुत्सहे॥ १३
यः सदेवान् मनुष्यांश्च सर्वांश्चैकरथोऽजयत्।
सोऽयं राज्ञो विराटस्य कन्यानां नर्तको युवा ॥
योऽतर्पयदमेयात्मा खाण्डवे जातवेदसम्।
सोन्तःपुरगतः पार्थ कूपेऽग्निरिव संवृतः ॥ १५
यस्माद्भयममित्राणां सदैव पुरुषर्षभात्।
स लोकपरिभूतेन वेषेणास्ते धनञ्जयः ॥ १६
यस्य ज्याक्षेपकठिनौ बाहू परिघसन्निभौ।
स शङ्खपरिपूर्णाभ्यां शोचन्नास्ते धनञ्जयः॥ १७
यस्य ज्यातलनिर्घोषात् समकम्पन्त शत्रवः।
स्त्रियो गीतस्वनं तस्य मुदिताः पर्युपासते ॥ १८
किरीटं सूर्यसङ्काशं यस्य मूर्द्धन्यशोभत।
वेणीविकृतकेशान्तः सोऽयमद्य धनञ्जयः ॥ १९
तं वेणीकृतकेशान्तं भीमधन्वानमर्जुनम्।
कन्यापरिवृतं दृष्ट्वा भीम सीदति मे मनः ॥ २०
यस्मिन्नस्त्राणि दिव्यानि समस्तानि महात्मनि।
आधारः सर्वविद्यानां स धारयति कुण्डले ॥ २१
स्प्रष्टुं राजसहस्राणि तेजसाऽप्रतिमानि वै।
समरे नाभ्यवर्तन्त वेलामिव महार्णवः ॥ २२
सोऽयं राज्ञो विराटस्य कन्यानां नर्तको युवा।
आस्ते वेशप्रतिच्छन्नः कन्यानां परिचारकः ॥२३
यस्य स्म रथघोषेण समकम्पत मेदिनी।
सपर्वतवना भीम सहस्थावरजङ्गमा ॥ २४

---

इति श्रीमहाभारते विराटपर्वणि नैलकण्ठीये भारतभावदीपे द्वादशोऽध्यायः ॥ १८ ॥ † कल्याणरूपा प्रशस्तरूपा।

१९

इदमिति ॥१॥ हीने नीचे असमे विषमे ॥२॥ प्रियसंवासात् प्रियस्य भीमसेनस्य संवासः सहवासः सम्बन्धः तस्मात्। तस्मिन् हस्त्यादिभिः सह योध्यमाने सति करुणावादिनी दीनवादिनी भवति ॥ १० ॥ संवासमेवाह अस्मिन्निति ॥ ११ ॥ निरयं दुःखम् ॥ १३ ॥ लोकेपरिभूतेन निन्दितेन ॥ १६ ॥ शङ्खपरिपूर्णाभ्यां बाहुभ्याम् ॥ १७ ॥ स्प्रष्टुमाकलयितुं यमिति शेषः। यस्येत्यपि पठन्ति। अप्रतिमानीति छेदः ॥ २२ ॥ दिशो

यस्मिन् जाते महाभागे कुन्त्याः शोको व्यनश्यत
स शोचयति मामद्य भीमसेन तवानुजः ॥ २५
भूषितं तमलङ्कारैः कुण्डलैः परिहाटकैः ।
कम्बुपाणिनमायान्तं दृष्ट्वा सीदति मे मनः ॥ २६
यस्य नास्ति समो वीर्ये कश्चिदुर्व्यां धनुर्धरः ।
सोऽद्य कन्यापरिवृतो गायन्नास्ते धनञ्जयः ॥ २७
धर्मे शौर्ये च सत्ये च जीवलोकस्य संमतम् ।
स्त्रीवेषविकृतं पार्थं दृष्ट्वा सीदति मे मनः ॥ २८
यदा ह्येनं परिवृतं कन्याभिर्देवरूपिणम् ।
*प्रभिन्नमिव मातङ्गं परिकीर्णं करेणुभिः ॥ २९
मत्स्यमर्थपतिं पार्थं विराटं समुपस्थितम् ।
पश्यामि †तुर्यमध्यस्थं दिशो नश्यन्ति मे तदा३०
नूनमार्या न जानाति कृच्छ्रं प्राप्तं धनञ्जयम् ।
अजातशत्रुं कौरव्यं मग्नं दुर्द्यूतदेविनम् ॥ ३१
तथा दृष्ट्वा यवीयांसं सहदेवं गवां पतिम् ।
गोषु गोवेषमायान्तं पाण्डुभूताऽस्मि भारत॥३२
सहदेवस्य वृत्तानि चिन्तयन्ती पुनः पुनः ।
न निद्रामभिगच्छामि भीमसेन कुतो रतिम् ३३
न विन्दामि महाबाहो सहदेवस्य दुष्कृतम् ।
यस्मिन्नेवंविधं दुःखं प्राप्नुयात् सत्यविक्रमः ॥३४
दूयामि भरतश्रेष्ठ दृष्ट्वा ते भ्रातरं प्रियम् ।
गोषु गोवृषसङ्काशं मत्स्येनाभिनिवेशितम् ॥ ३५
संरब्धं रक्तनेपथ्यं गोपालानां पुरोगमम् ।
विराटमभिनन्दन्तमथ मे भवति ज्वरः ॥ ३६
सहदेवं हि मे वीरं नित्यमार्या प्रशंसति ।
महाभिजनसंपन्नः शीलवान् वृत्तवानिति ॥ ३७
ह्रीनिषेवो मधुरवाक् धार्मिकश्च प्रियश्च मे ।
स तेऽरण्येषु वोढव्यो याज्ञसेनि क्षपास्वपि ॥३८
सुकुमारश्च शूरश्च राजानं चाप्यनुव्रतः ।
ज्येष्ठापचायिनं वीरं स्वयं पाञ्चालि भोजयेः ३९
इत्युवाच हि मां कुन्ती रुदती पुत्रगृद्धिनी ।
प्रव्रजन्तं महारण्यं तं परिष्वज्य तिष्ठती ॥ ४०
तं दृष्ट्वा व्यापृतं गोषु वत्सचर्मक्षपाशयम् ।
सहदेवं युधां श्रेष्ठं किं नु जीवामि पाण्डव ॥ ४१
यस्त्रिभिर्नित्यसंपन्नो रूपेणास्त्रेण मेधया ।
सोऽश्वबन्धो विराटस्य पश्य कालस्य पर्ययम् ॥
अभ्यकीर्यन्त वृन्दानि दामग्रन्थिमुदीक्ष्य तम् ।
विनयन्तं जवेनाश्वान् महाराजस्य पश्यतः ॥ ४३
अपश्यमेनं श्रीमन्तं मत्स्यं भ्राजिष्णुमुत्तमम् ।
विराटमुपतिष्ठन्तं दर्शयन्तं च वाजिनः ॥ ४४
किं नु मां मन्यसे पार्थ सुखिनीति परन्तप ।
एवं दुःखशताविष्टा युधिष्ठिरनिमित्ततः ॥ ४५
अतः प्रतिविशिष्टानि दुःखान्यन्यानि भारत ।
वर्तन्ते मयि कौन्तेय वक्ष्यामि शृणु तान्यपि॥४६
युष्मासु म्रियमाणेषु दुःखानि विविधान्युत ।
शोषयन्ति शरीरं मे किं नु दुःखमतः परम् ॥४७

इति श्रीमहाभारते विराटपर्वणि कीचकवधपर्वणि द्रौपदीभीमसंवादे
एकोनविंशोऽध्यायः ॥ १९ ॥

## २०

द्रौपद्युवाच ।
अहं सैरन्ध्रिवेषेण चरन्ती राजवेश्मनि ।
शौचदाऽस्मि सुदेष्णाया अक्षधूर्तस्य कारणात् १
विक्रियां पश्य मे तीव्रां राजपुत्र्याः परन्तप ।
आत्मकालमुदीक्षन्ती सर्वं दुःखं किलान्तवत् २

नश्यन्ति शोकेन आन्ध्यमायातीत्यर्थः ॥ ३० ॥ आर्या श्वश्रूः ॥ ३१ ॥ गोवेषं महोक्षसदृशम् ॥ ३२ ॥ दूयामि खेदं प्राप्नोमि ॥ ३५ ॥ रक्तनेपथ्यं रक्तं गैरिकादिधातुमयं नेपथ्यसलङ्कारो यस्य तम् ॥ ३६ ॥ ज्येष्ठापचायिनं ज्येष्ठपूजकम् ॥ ३९ ॥ वत्सचर्मणि क्षपायां शेते इति तं वत्सचर्मक्षपाशयम् ॥ ४१ ॥ अभ्यकीर्यन्त व्यशीर्यन्त वृन्दानि शत्रूणामिति शेषः । दामग्रन्थिं ग्रन्थिकम् ॥ ४३ ॥ एनं नकुलं वाजिनोऽश्वान् दर्शयन्तं विराटं विराटाय ॥ ४४ ॥ म्रियमाणेषु जीवत्सु ॥ ४७ ॥ इति श्रीमहाभारते विराटपर्वणि नैलकण्ठीये भारतभावदीपे एकोनविंशोऽध्यायः ॥ १९ ॥ * प्रभिन्नम्-मत्तम् । † तुर्यं वाद्यादि ।

——

२०

अहमिति । सैरन्ध्र्या वेषेण सैरन्ध्रीवेषेण । शौचदा मृज्जलादिशौचसाधनप्रदा ॥ १ ॥

अनित्या किल मर्त्यानामर्थसिद्धिर्जयाजयौ ।
इतिकृत्वा प्रतीक्षामि भर्तॄणामुदयं पुनः ॥ ३
चक्रवत्परिवर्तन्ते ह्यर्थाश्च व्यसनानि च ।
इतिकृत्वा प्रतीक्षामि भर्तॄणामुदयं पुनः ॥ ४
य एव हेतुर्भवति पुरुषस्य जयावहः ।
पराजये च हेतुश्च स इति प्रतिपालये ।
किं मां न प्रतिजानीषे भीमसेन मृतामिव ॥ ५
दत्वा याचन्ति पुरुषा हत्वा वध्यन्ति चापरे ।
पातयित्वा च पात्यन्ते परैरिति च मे श्रुतम् ॥६
न दैवस्यातिभारोऽस्ति न चैवास्यातिवर्तनम् ।
इति चाप्यागमं भूयो दैवस्य प्रतिपालये ॥ ७
स्थितं पूर्वं जलं यत्र पुनस्तत्रैव गच्छति ।
इति पर्यायमिच्छन्ती प्रतीक्षे उदयं पुनः ॥ ८
दैवेन किल यस्यार्थः सुनीतोऽपि विपद्यते ।
दैवस्य चागमे यत्नस्तेन कार्यो विजानता ॥ ९
यत्तु मे वचनस्यास्य कथितस्य प्रयोजनम् ।
पृच्छ मां दुःखितां तत्त्वं पृष्टा चात्र ब्रवीमि ते ॥
महिषी पाण्डुपुत्राणां दुहिता द्रुपदस्य च ।
इमामवस्थां संप्राप्ता मदन्या का जिजीविषेत् ॥
कुरून् परिभवेत् सर्वान् पाञ्चालानपि भारत ।
पाण्डवेयांश्च संप्राप्तो मम क्लेशो ह्यरिन्दम ॥१२
भ्रातृभिः श्वशुरैः पुत्रैर्बहुभिः परिवारिता ।
एवं समुदिता नारी का त्वन्या दुःखिता भवेत् ॥
नूनं हि बालया धातुर्मया वै विप्रियं कृतम् ।
यस्य प्रसादाद्दुर्नीतं प्राप्ताऽस्मि भरतर्षभ ॥ १४
वर्णावकाशमपि मे पश्य पाण्डव यादृशम् ।
तादृशो मे न तत्रासीद्दुःखे परमके तदा ॥ १५
त्वमेव भीम जानीषे यन्मे पार्थ सुखं पुरा ।
साऽहं दासीत्वमापन्ना न शान्तिमवशा लभे १६
नादैविकमहं मन्ये यत्र पार्थो धनञ्जयः ।
भीमधन्वा महाबाहुरास्ते छन्न इवानलः ॥ १७
अशक्या वेदितुं पार्थ प्राणिनां वै गतिर्नरैः ।
विनिपातमिमं मन्ये युष्माकं ह्यविचिन्तितम् १८
यस्या मम मुखप्रेक्षा यूयमिन्द्रसमाः सदा ।
सा प्रेक्षे मुखमन्यासामवराणां वरा सती ॥ १९
पश्य पाण्डव मेऽवस्थां यथा नार्हामि वै तथा ।
युष्मासु ध्रियमाणेषु पश्य कालस्य पर्ययम् ॥२०
यस्याः सागरपर्यन्ता पृथिवी वशवर्तिनी ।
आसीत् साऽद्य सुदेष्णाया भीताऽहं वशवर्तिनी
यस्याः पुरःसरा आसन् पृष्ठतश्चानुगामिनः ।
साऽहमद्य सुदेष्णायाः पुरः पश्चाच्च गामिनी २२
इदं तु दुःखं कौन्तेय ममासह्यं निबोध तत् ।
या न जातु स्वयं पिंषे गात्रोद्वर्तनमात्मनः ।
अन्यत्र कुन्त्या भद्रं ते सा पिनष्म्यद्य चन्दनम् ॥
पश्य कौन्तेय पाणी मे नैवाभूतां हि यौ पुरा ।
इत्यस्य दर्शयामास किणवन्तौ करावुभौ ॥ २४
बिभेमि कुन्त्या या नाहं युष्माकं वा कदाचन ।
साऽद्याग्रतो विराटस्य भीता तिष्ठामि किङ्करी२५
किं नु वक्ष्यति सम्राण्मां वर्णकः सुकृतो न वा ।
नान्यपिष्टं हि मत्स्यस्य चन्दनं किल रोचते॥२६

---

पुरुषस्य दुर्योधनादेः यः कालः स एव काल एव । प्रतिपालये कालमिति शेषः ॥५॥ काल एव सर्वं विपरीतं करोतीत्याह–दत्वेति । ये स्वयं दातारस्त एव कालेन दरिद्राः सन्तो याचका भवन्तीत्यर्थः । तथा अन्यान् हत्वा परैरपि वध्यन्ति वध्यन्ते । पातयित्वा अन्यान् त एवान्यैः पात्यन्त इति ॥ ६ ॥ अतिभारो- दुष्करं दैवस्य किमपि नास्ति ॥ अस्य दैवस्य अतिवर्तनमतिक्रमणं च नास्ति ॥ केनचित्कृतामिति शेषः । दैवस्य प्राधान्यप्रतिपादकमागमं प्रतिपालये मानये । दैवाधीनाऽस्मीति मत्वा न शोचामीत्यर्थः ॥ ७ ॥ स्थितमिति । यथा रिक्तं सरः पुनः कालेन पूर्यते एवमहमपि पुनः श्रियं प्राप्स्यास्येवेति निश्चयेन पर्यायं कालवैपरीत्यमिच्छन्ती ॥ ८ ॥ यस्य पुंसोऽर्थो दैवेन विपद्यते नश्यति तेन दैवस्यैव आगमे आनुकूल्ये यत्नः कार्यः दैवान्नष्टोऽर्थः पुनर्जपहोमादिना आहर्तव्य इत्यर्थः ॥९॥ कुरूनिति । मम मत्सम्बन्धी मन्निमित्तकः कचग्रहादिरयं क्लेशः पाण्डवेयान् पाण्डोः स्त्री पाण्डवी कुन्ती तस्याः पुत्रान् युष्मान् प्राप्तः सन् कुरून् भीष्मादीन् पाञ्चालान् द्रुपदादींश्च परिभवेत् नाशयेदित्यर्थः ॥ १२ ॥ समुदिता सम्यगुदयवत्यपि एवं काऽन्या दुःखिता भवेन्न काऽपि श्रीमतामापदो न दृष्टा एव मम तु दृष्टा इति महदाश्चर्यमिति भावः ॥ १३ ॥ बाल्या न तु प्रौढया तं बाल्ये कृतमपराधं न स्मरामि । यस्य प्रसादाददिदं दुर्नीतं दुरवस्थां प्राप्ताऽस्मि ॥ १४ ॥ वर्णावकाशो दीप्तिसङ्कोचः । वन्यान्नवल्कलधारणयुक्तात् स्वातन्त्र्याद्दिव्यान्नवस्त्रसंयुक्तं पारतन्त्र्यमतिदुःखदमिति भावः। तत्र वने इदानीं यथादीप्तिसङ्कोचोऽस्ति न तथा वने आसीदित्यर्थः ॥ १५ ॥ अवशा पराधीना ॥ १६ ॥ अदैविकं न किं तु दैविकमेव ॥१७॥ विनिपातं पराभवम् ॥१८॥ पुरा किणवन्तौ नैवाऽभूतां किं त्विदानीमेव जातावित्यर्थः ॥ २४ ॥ वर्णको विलेपनम् । 'वर्णकश्चारणेऽस्त्री तु चन्दने' इति मेदिनी । 'वर्णकोऽस्त्रीविलेपनम्' इत्यमरः ॥ २६ ॥